CC-O. In Public Domain. Digitized by eGangotri

ॐ

Sanskrit Self Teacher

Easy way to the study of Sanskrit.

Part 15 th.

Author

Dr. Pandit S. D. Satwalekar



Rs. 2-00

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sanskrit Self Teacher

PART 15

By

Dr. Pandit. S. D. SATWALEKAR

Sri Vidya Bharathi
Book Centre,
Bharathi Street,
SRINGERI - 577 139.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Verbs of 2nd, 4th and 6th Conjugation

We have shown in the 13th part how to frame the forms of the verbs of the 1st conjugation, and in the 14th part, those of the 10th conjugation. These two conjugations alone are full of such verbal roots as are very useful and those two comprise most of the roots in the Sanskrit language. If, therefore, these two conjugations are learnt well, the students will have learnt more than half the number of the roots in this language. Now we give hereafter some of the rest of the conjugations. Out of them three conjugations, namely, 2nd 4th and the 6th conjugational roots have been treated in this book. We hope that the students will learnt them also well.

For easy understanding, in this book firstly the 6th conjugation, then the 4th and lastly the second have been treated.

Shripad Damodar Satwalekar

Second Edition 1989

*

Printed & Published by V. S. Satwalekar,
Swadhyaya Mandal, Bharat-Mudranalaya,
PARDI, Dist. Valsad (Gujarat) India

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sanskrit Self Teacher

PART 15

Lesson– 1

Roots of 6th conjugation

It has been shown previously. that in the case of the roots of 1st conjugation, 'अ' is placed before the (tense) suffix and in the case of the 10th 'अय' In the same way in the 6th conjugation 'अ' is inserted. But in the case of the 1st conjugation गुण* is formed in the root and in the 6th, this is absent.

---

*'गुण' means अ, ए, ओ. This 'गुण' takes the place of the इक्. i. e., इ, उ, ऋ, ऌ in the root. when there is अ in the root it is unchanged because it is it self गुण; but इ or ई = becomes ए, उ or ऊ becomes ओ; ऋ becomes अर्, ऌ becomes अल्. (This is not only true of the 1st conjugation but of some others as well, except the 6th). For examples– विद् becomes वेद्; वी becomes वे; बुध्; becomes बोध्; भू becomes भो; कृ becomes कर्. This much is enough here to explain the meanings of गुण and its function.

×

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

1 बुध् = (to know) 1st conjugation–

बोधति, बोधतः, बोधन्ति ।

2 गुज् = (to make noise) 1st and 6th conjugations– गुजति, गुजतः गुजन्ति in the 6th and गोजति, गोजतः, गोजन्ति in the 1st.

If the root बुध् had been in the 6th conjugation, it would have become बुधति, (but now it is not so). But the root गुज् which is also in the 1st conjugation becomes गोजति there.

This much is enough to show the broad difference between the 1st and 6th conjugation. The students should wear in mind this difference. The rest in the 6th conjugation resembles in many items, the 1st cojugation. The absence of गुण in the 6th conjugation is the main difference. Now see the further forms–

'चल्' = (to go, to move) 6th conjugation

१ लट् = (Present) = १ चलति, चलतः, चलन्ति । २ चलसि, चलथः, चलथ । ३ चलामि, चलावः, चलामः ।

२ लिट् = (Past perfect) = १ चचाल, चेलतुः, चेलुः । २ चेलिथ, चेलथुः, चेल । ३ चचाल, चेलिव, चेलिम ।

३ लुट् = (1st future) = १ चलिता, चलितारौ, चलितारः । २ चलितासि, चलितास्थः, चलितास्थ । ३ चलितास्मि, चलितास्वः, चलितास्मः ।

४ लृट् = (Simple future)=१ चलिष्यति, चलिष्यतः, चलिष्यन्ति । २ चलिष्यसि, चलिष्यथः, चलिष्यथ । ३ चलिष्यामि, चलिष्यावः, चलिष्यामः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५ लेट् = (In the Vedas, in the meaning of लिङ्)

६ लोट् = (Imperative) = १ चलतु, चलताम्, चलन्तु । २ चल, चलतम्, चलत । ३ चलानि, चलाव, चलाम ।

७ लङ् = (Patt imperfect) = १ अचलत्, अचलताम्, अचलन् । २ अचलः, अचलतम्, अचलत । ३ अचलम्, अचलाव, अचलाम ।

८ लिङ् = (Potential) = १ चलेत्, चलेताम्, चलेयुः । २ चलेः, चलेतम्, चलेत । ३ चलेयम्, चलेव, चलेम । (Benedictive) = १ चल्यात्, चल्यास्ताम्, चल्यासुः । २ चल्याः, चल्यास्तम्, चल्यास्त । ३ चल्यासम्, चल्यास्व, चल्यास्म ।

९ लुङ् = (Aorist) = १ अचालीत्, अचालिष्टाम्, अचालिषुः । अचालीः, अचालिष्टम्, अचालिष्ट । ३ अचालिषम्, अचालिष्व, अचालिष्म ।

१० लृङ् = (conditional) = १ अचलिष्यत् अचलिष्यताम्, अचलिष्यन् । २ अचलिष्यः, अचलिष्यतम्, अचलिष्यत । ३ अचलिष्यम्, अचलिष्याव, अचलिष्याम ॥

Students should frame forms of this conjugational root in this manner in the parasmaipad. (परस्मैपद)

6th conjugation Parasmaipada roots

इष् = (to wish) इच्छति । इयेष । एषिता, एष्टा । एषिष्यति ।

उज्झ् = (to leave, to give up) उज्झति । उज्झाञ्चकार । उज्झिता । उज्झिष्यति ।

ऋच् = (to praise) ऋचति । आनर्च । अर्चिता । अर्चिष्यति ।

ऋच्छ् = (to go) ऋच्छति । आनर्च्छ । ऋच्छिता । ऋच्छिष्यति ।

कुच् = (to contract) कुचति । चुकोच । कुचिता । कुचिष्यति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कुट् = (to be crooked) कुटति । चुकोट । कुटिता । कुटिष्यति ।
कृत् = (to cut) कृन्तति । चकर्त । करिता । कर्तिष्यति, कर्त्स्यति ।
कॄ = (to throw) किरति । चकार । करिता । करिष्यति ।
क्षुर् = (to shave) क्षुरति । चुक्षोर । क्षोरिता । क्षोरिष्यति ।
गु = (to go to stool) गुवति । जुगाव । गुता । गुष्यति ।
गुज् = (to make noise) गुजति । जुगोज । गुजिता । गुजिष्यति ।
गुञ्ज् = (to make inarticulate noise, to buzz) गुञ्जति । जुगुञ्ज । गुञ्जिता । गुञ्जिष्यति ।
गुम्फ् = (to make garland) गुम्फति । जुगुम्फ । गुम्फिता । गुम्फिष्यति ।
गॄ = (to swallow) गिरति । जगार । गरिता । गरिष्यति । गिलति । जगाल । गलिता । गलिष्यति ।
घुर् = (to make noise) घुरित । जुघोर । घोरिता । घोरिष्यति ।
घूर्ण् = (to swing) घूर्णति । जुघूर्ण । घूर्णिता । घूर्णिष्यति ।
चल् = (to go) चलति । चचाल । चलिता । चलिष्यति ।

संस्कृत–वाक्यानि

१ त्वं किं इच्छसि ? तौ किं इच्छतः ? ते क्रीडितुं इच्छन्ति । स कदा क्रीडां कर्तुं शक्ष्यति ? सर्वे बालकाः धावितुं शक्ष्यन्ति किम् ?

२ पण्डिताः परमात्मानं ऋचन्ति । कः एवं देवं आनर्च ? यदि त्वं अर्चिष्यसि तर्हि अहमपि देवं तथा अर्चिष्यामि ।

३ यथा काष्ठाकारः काष्ठं कृन्तति तथा वयं न कृन्तामः । नापितः केशान् कृन्तति ।

४ बालकः बालकेन सह गुजति । तदा एवं कः जुगोज ? यूयं कदा गुजिष्यथ ? सर्वे पुरुषाः तत्र गुजन्ति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५ बालिकाः पुष्पाणां मालाः गुम्फन्ति । मालाकारः उद्यानात् पुष्पाणि आनयति मालां च गुम्फति । त्वं कदा मालां गुम्फिष्यसि ?

६ वंशकारः चक्राणि घूर्णति । त्वं किं घूर्णसि ? यदा स घूर्णिष्यति तदा त्वं किं करिष्यसि ?

७ सर्वे मानवाः सायंकाले भ्रमणाय चलिष्यन्ति किम् ? बालकाः भ्रमणाय चलन्तु । त्वं अपि भ्रमणाय चल ।

The students should frame the forms of the verbs and construct sentences thus, advancing their progress. They will be able to speak in sanskrit by making use of the words in this way.

Lesson– 2

Now in this lesson, we give some roots and verb-forms of the 6th conjugation, Parasmaipada, for the benefit of the students.

जुड् = (to join)

१ लट् = (Present) = १ जुडति, जुडतः, जुडन्ति । २ जुडसि, जुडथः, जुडथ । ३ जुडामि, जुडावः, जुडामः ।

'तिल्' = (to oil)

२ लिट् = (Past perfect) = १ तितेल, तितिलतुः, तितिलुः । २ तितेलिथ, तितिलथुः, तितिल । ३ तितेल, तितिलिव, तितिलिम ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'तृप्' = (to be satisfied)

३ लुट् = (Ist future) = १ तर्पिता, तर्पितारौ, तर्पितारः। २ तर्पितासि, तर्पितास्थः, तर्पितास्थ। ३ तर्पितास्मि, तर्पितास्वः, तर्पितास्मः।

सूचना— This root has 'तर्ता, त्रप्ता' also as their forms.

'त्रुट्' = (to cut, to break)

४ लट् = (simple future) = १ त्रुटिष्यति, त्रुटिष्यतः, त्रुटिष्यन्ति। २ त्रुटिष्यसि, त्रुटिष्यथः, त्रुटिष्यथ। ३ त्रुटिष्यामि, त्रुटिष्यावः, त्रुटिष्यामः।

५ लेट् = (The use of this is only in the vadas)

'धु' = (to shake)

६ लोट् = (Inperative) = १ धुवतु, धुवताम्, धुवन्तु। २ धुव, धुवतम्, धुवत। ३ धुवानि, धुवाव, धुवाम।

'नु' = (to praise)

७ लङ् = (past imperfect) = १ अनुवत्, अनुवताम्, अनुवन्। २ अनुवः, अनुवतम्, अनुवत। ३ अनुवम्, अनुवाव, अनुवाम।

Frame other forms in this way,

6th Conjugational roots

चुट् = (to break) चुटति। चुचोट। चुटिता। चुटिष्यति।
छुर् = (to split) छुरति। चुछोर। छुरिता। छुरिष्यति।
जुड् = (to join, to tie) जुडति। जुजोड। जुडिता। जुडिष्यति।
तिल् = (to oil) तिलति। तितेल। तेलिता। तेलिष्यति।
तुट् = (to break, to sweep) तुटति। तुतोट। तुटिता। तुटिष्यति।
तुड् = (to break) तुडति। तुतोड। तुडिता। तुडिष्यति।
तृप् = (to be satisfied) तृपति। ततर्प। तर्पिता। तर्पिष्यति।
त्रुट् = (to cut) त्रुटति। तुत्रोट। त्रुटिता। त्रुटिष्यति।

Sri Vidyabharathi Book Centre, Sirsi

CC-O. In Public Domain. Digitized by eGangotri

दृभ् = (to make connection) दृभति । ददर्भ । दर्भिता । दर्भिष्यति ।
संदृभ् = (to make connection) संदृभति । संददर्भ । संदर्भिता । संदर्भिष्यति ।
धि = (to wear) धिवति । दिधाय । धेता । धेष्यति ।
धु = (to shake) धुवति । दुधाव । धुविता । धुविष्यति ।
ध्रु = (to move, to stay) ध्रुवति । दुध्राव । ध्रुता । ध्रुष्यति ।
नू = (to praise) नुवति । नुनाव । नुविता । नुविष्यति ।
पिश् = (to form) पिशति । पिपेश । पेशिता । पेशिष्यति ।
पुण् = (to do good deeds) पुणति । पुपोण । पोणिता । पोणिष्यति ।
पुर् = (to go forward) पुरति । पुपोर । पोरिता । पोरिष्यति ।
पृण् = (to be satisfied) पृणति । पपर्ण । पर्णिता । पर्णिष्यति ।
पृच्छ् = (to ask) पृच्छति । पप्रच्छ । प्रष्टा । प्रक्ष्यति ।
बृह् = (to work) बृहति । बबर्ह । बर्हिता । बर्हिष्यति ।
भुज् = (to go crooked) भुजति । बुभोज । भोक्ता । भोक्ष्यति ।
मृज् = (to bathe) मज्जति । ममज्ज । मंक्ता । मंक्ष्यति ।
मृ = (to die) मरति । ममार । मर्ता । मरिष्यति ।

संस्कृत-वाक्यानि

१ यथा नापितस्य क्षुरः छुरति तथा शूरस्य शस्त्राणि अपि छुरन्ति एव । तव छुरिकाः बालकं छुरिष्यन्ति ।

२ त्वं किमर्थं वृक्षं तुडसि ? कः उद्यानस्य वृक्षान् तुतोड ? यः वृक्षं तुतोड स कुत्र अस्ति ?

३ स देवान् मनुष्यान् पितॄन् च अन्नेन तर्पिष्यति । यः सदा अन्नादिना देवादीन् तृपति स एव श्रेष्ठो मनुष्यः ।

४ वायुः वनस्थान् वृक्षान् धुवति । त्वं किमर्थं तत् काष्ठं अधुवः । स एव वस्त्रं धुवतु । त्वं तत् तथा मा धुव ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५ त्वं अधुना कं नुवसि ? सर्वे मानवाः परमात्मानं नुवन्तु । कः अपि मानवं मा नुवतु ।

६ शृणु स त्वां किं पृच्छति ? यूयं पृच्छथ ? ते प्रश्यन्ति : यूयं सर्वे अपि प्रश्नान् पृच्छथ ।

७ छात्रा नदीजले मज्जन्ति । ते सर्वे मनुष्याः तस्मिन् अगाधे जले ममज्जुः । त्वं कदा मंक्ष्यसि ?

८ सर्वेऽपि प्राणिनः जलेन उदरं पृणन्ति । त्वं कदा तत्पात्रं अपृणः ? मेघः जलेन पृथिवीं पर्णिष्यति ।

९ अहं इदानीं तिलामि । स श्वः तेलिष्यति । त्वं कदा तेलिष्यसि ? यदा सर्वे तेलिष्यन्ति तदा अहमपि तेलिष्यामि ।

The students should construct sentences in this way and advance their knowledge. Now we give some more roots—

6th conjugational roots in परस्मैपद

मृश् = (to consider) मृशति । ममर्श । म्रष्टा । म्रक्ष्यति ।
रुज् = (to be broken) रुजति । रुरोज । रोक्ता । रोक्ष्यति ।
लिख् = (to write) लिखति । लिलेख । लेखिता । लेखिष्यति ।
विश् = (to enter) विशति । विवेश । वेष्टा । वेक्ष्यति ।
व्रश्च् = (to cut) व्रश्चति । वव्रश्च । व्रश्चिता, व्रष्टा । व्रश्चिष्यति । व्रक्ष्यति ।
शुभ् = (to be beautiful) शुभति । शुशोभ । शोभिता । शोभिष्यति ।
सुर् = (to be rich) सुरति । सुषोर । सोरिता । सोरिष्यति ।
सू = (to induce) सुवति । सुषाव । सविता । सविष्यति ।
सृज् = (to create) सृजति । ससर्ज । स्रष्टा । स्रक्ष्यति ।
स्पृश् = (to touch) स्पृशति । पस्पर्श । स्प्रष्टा । स्प्रक्ष्यति ।
स्फुट् = (to blossom) स्फुटति । पुस्फोट । स्फुटिता । स्फुटिष्यति ।
स्फुर् = (to be explicit) स्फुरति । पुस्फोर । स्फुरिता । स्फुरिष्यति ।

CC-O. In Public Domain. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

स्फुल् = (to shake) स्फुलति। फुस्फोल। स्फुलिता। स्फुलिष्यति।
हिल् = (to shake to love) हिलति। जिहेल। हेलिता। हेलिष्यति।

Some forms of tenses

'विश्' = (to enter)

८ लिङ् (potential) = १ विशेत्, विशेताम्, विशेयुः। २ विशेः, विशेतम्, विशेत। ३ विशेयम्, विशेव, विशेम॥

(Benedictive) = १ विश्यात्, विश्यास्ताम् विश्यासुः। २ विश्याः; विश्यास्तम्, विश्यास्त। ३ विश्याम्, विश्यास्व, विश्यास्म॥

९ लुङ् (Aorist) = १ अविक्षत्, अविक्षताम्, अविक्षन्। २ अविक्षः; अविक्षतम्, अविक्षत। ३ अविक्षम्, अविक्षाव, अविक्षाम॥

१० लृङ् (conditional) = १ अवेक्ष्यत्, अवेक्ष्यताम्, अवेक्ष्यन्। २ अवेक्ष्यः, अवेक्ष्यतम्, अवेक्ष्यत। ३ अवेक्ष्यम्, अवेक्ष्याव, अवेक्ष्याम॥

संस्कृत–वाक्यानि

१ त्वं किं इदानीं मृशसि? अहं किमपि न मृशामि। त्वं एव सर्वं मृश। मनुष्याः मृशन्तु। त्वं किं न अक्ष्यसि?

२ बालकाः स्वगृहे विशन्तु। पक्षिणः तत्र न वेक्ष्यन्ति। त्वं कदा तस्मिन् गृहे वेक्ष्यसि?

३ अधिकारिणः पत्राणि लिखन्ति। रामः एकं पत्रं लिलेख। यदि त्वं निबन्धं लिखिष्यसि तर्हि अहं नैव लेखिष्यामि।

४ मलिनाः पुरुषाः तत्र जलं स्पृशन्तु। त्वं तान् रुग्णान् न स्पृश। अहमेव तं स्पक्ष्यामि।

५ नटः तत्र कथं हिलति तत् पश्य। त्वं तथा न हिलसि। कदा त्वं तथा अहिलः यथा स हिलति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

६ त्वं सर्वानपि वृक्षान् किमर्थं वृश्चसि ? स कदा वनस्पतीन् ववश्च ? अहं कदापि नैव व्रश्चिष्यामि ।

७ नरपतिः सभायां शुभति । त्वमपि तथा शुभसि यथा स शुभति । अलंकारैः त्वं शोभिष्यसि ।

The students should improve themselves by constructing such sentences.

Lesson– 5

6th conjugational आत्मनेपदी roots

The students have seen the formation of the Parasmaipada roots of the 6th conjugation. Now we show the formation of Atmanepada roots of the same—

'कुच' = (to make noise)

१ लट् (Present) = १ कुचते, कुचेते, कुचन्ते । २ कुचसे, कुचेथे, कुचध्वे । ३ कुचे, कुचावहे, कुचामहे ॥

'जुष्' = (to use)

२ लिट् (past perfect) = १ जुजुषे, जुजुषाते, जुजुषिरे । २ जुजुषिषे, जुजुषाथे, जुजुषिध्वे । ३ जुजुषे, जुजुषिवहे, जुजुषिमहे ।

'आ–दृ' = (to honour)

३ लुट् (1st future) = १ आदर्ता, आदर्तारौ, आदर्तारः । २ आदर्तासे, आदर्तासाथे, आदर्ताध्वे । ३ आदर्ताहे, आदर्तास्वहे, आदर्तास्महे ।

'धृ' = (to be)

४ लृट् (simple future) = १ धरिष्यते, धरिष्येते, धरिष्यन्ते । २ धरिष्यसे, धरिष्येथे, धरिष्यध्वे । ३ धरिष्ये, धरिष्यावहे, धरिष्यामहे ।

Sri Vidyabharati Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

'लज्ज्' = (to be shy)

१ लोट् (Inperative)=१ लज्जताम्, लज्जेताम्, लज्जन्ताम्। २ लज्जस्व, लज्जयाम्, लज्जध्वम्। ३ लज्जै, लज्जावहै, लज्जामहै॥

The students should frame the forms like this form of the following roots.

6th conjugational आत्मनेपदी roots.

कुङ् = (to make noise) कुवते। चुकुवे। कुविता। कुविष्यते।
जुष् = (to have, to use) जुषते। जुजुषे। जोषिता। जोषिष्यते।
आद्द = (to honour) आद्रियते। आदद्रे। आदर्ता। आदरिष्यते।
धृ = (to be, to wear) ध्रियते। दध्रे। धर्ता। धरिष्यते।
लज्ज् = (to be shy) लज्जते। ललज्जे। लज्जिता। लज्जिष्यते।

Note– Some forms of 'मृ' root belong to परस्मैपद and some to आत्मनेपद.

Make sentences using these forms.

संस्कृत–वाक्यानि

१ कः अत्र कुवते? किमर्थं कुवते? त्वं किं न तथा कुवसे यथा स कुवते? वयं न कुवामहे।

२ त्वं किं जोषिष्यसे? आवां जुषावहे, वयमपि जुषामहे। ते जोषितारः।

३ छात्राः गुरुं आदरिष्यन्ते। कौ छात्रौ गुरुं न आदरिष्येते? त्वं राजानं किं न आदरिष्यसे?

४ सर्वाः स्त्रियः लज्जन्ते। त्वं एवं किमर्थं लज्जसे? कः अपि पुरुषः एवं न लज्जते।

५ प्राणिनः म्रियन्ते। मानवाः अपि म्रियन्ते। कथं योगी शीघ्रं न म्रियते?

The roots of the verbs are used this way.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

6th conjugational उभयपदी roots

The roots of उभयपदी have both the forms of परस्मैपद and आत्मनेपद.

'कृष्' = (to plough)

१ लट् (Present) = (परस्मैपदी) = १ कृषति, कृषतः, कृषन्ति । २ कृषसि, कृषथः, कृषथ । कृषामि, कृषावः, कृषामः ॥

(आत्मनेपदी) = १ कृषते, कृषेते, कृषन्ते । २ कृषसे, कृषेथे, कृषध्वे । ३ कृषे, कृषावहे, कृषामहे ॥

'क्षिप्' = (throw)

२ लङ् (Past imperfect) = (परस्मैपदी) = १ अक्षिपत्, अक्षिपताम्, अक्षिपन् । २ अक्षिपः, अक्षिपतम्, अक्षिपत । ३ अक्षिपम्, अक्षिपाव, अक्षिपाम ॥

(आत्मनेपदी) = १ अक्षिपत, अक्षिपेताम्, अक्षिपन्त । २ अक्षिपथाः, अक्षिपेथाम्, अक्षिपध्वम् । ३ अक्षिपे, अक्षिपावहि अक्षिपामहि ॥

'तुद्' = (to be in grief)

३ लोट् (Imperative) = (परस्मैपदी) १ तुदतु, तुदताम्, तुदन्तु । २ तुद, तुदतम्, तुदत । ३ तुदानि, तुदाव, तुदाम ॥

(आत्मने०) = १ तुदताम्, तुदेताम्, तुदन्ताम् । २ तुदस्व, तुदेथाम्, तुदध्वम् । ३ तुदै, तुदावहै, तुदामहै ॥

'मुच्' = (to give up)

४ विधिलिङ् (potential) परस्मै० = १ मुञ्चेत्, मुञ्चेताम्, मुञ्चेयुः । २ मुञ्चेः, मुञ्चेतम्, मुञ्चेत । ३ मुञ्चेयम्, मुञ्चेव, मुञ्चेम ॥

(आत्मने०) = १ मुञ्चेत, मुञ्चेयाताम्, मुञ्चेरन् । २ मुञ्चेथाः, मुञ्चेयाथाम्, मुञ्चेध्वम् । ३ मुञ्चेय, मुञ्चेवहि, मुञ्चेमहि ॥

Now see some more roots of उभयपदी

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

6th conjugational उभयपदी Roots

कृष् = (to plough) कृषति–ते। चकर्ष, चकृषे। कर्ष्टा, कर्ष्टा। कर्क्ष्यति–ते। अकृक्षत–ते।

क्षिप् = (to throw) क्षिपति–ते। चिक्षेप। क्षेप्ता। क्षेप्स्यति–ते।

तुद् = (to be in grief) तुदति–ते। तुतोद, तुतुदे। तोत्ता। तोत्स्यति–ते।

दिश् = (to say, to order) दिशति–ते। दिदेश, दिदिशे। देष्टा। देक्ष्यति–ते।

नुद् = (to inspire) नुदति–ते। नुनोद, नुनुदे। नोता। नोत्स्यति–ते।

भ्रस्ज् = (to fry) भृज्जति–ते। बभ्रज्ज, बभर्ज, भर्ष्टा। भ्रक्ष्यति–ते।

मिल् = (to meet) मिलति–ते। मिमेल, मिमिले। मेलिता। मेलिष्यति–ते।

मुंच् = (to give up) मुञ्चति–ते। मुमोच, मुमुचे। मोक्ता। मोक्ष्यति–ते।

लिप् = (to smear) लिम्पति–ते। लिलेप, लिलिपे। लेप्ता। लेप्स्यति–ते।

विद् = (to gain) विन्दति–ते। विवेद, विविदे। वेत्ता, वेदिता। वेत्स्यति–ते, वेदिष्यति–ते।

सिच् = (to pour water) सिंचति–ते। सिषेच, सिषिचे। सेक्ता। सेक्ष्यति–ते।

Make sentences using these forms.

संस्कृत–वाक्यानि

१ कृषीवलाः भूमिं कृषन्ति। ते भूमिं कदा कर्क्ष्यन्ते? प्रथमं राजा भूमिं कृषते, पश्चात् प्रजाजनाः कृषन्ते।

२ सः वस्त्रं कूपे क्षिपति। अहं मम वस्त्रं तत्र न अक्षिपम्। तौ तत्र क्षेप्स्येते किं?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

३ तस्य भृत्यः तुदति । सः अतुदत् । तौ न अतुदेताम् । स तत्र तोत्स्यति किम् ?

४ रामः लक्ष्मणं दिदेश । स त्वां कदा देक्ष्यति ? अहं तं न अदिशम् । स एव सर्वान् दिशतु ।

५ स धान्यं भुञ्जते । स न बभर्ज । अहं एव चणकान् भक्ष्यामि । त्वं भक्ष्यसि किम् ?

६ सः अद्य तं मिलति । न स गतमासे एव मिमेल । त्वं कदा मेलिष्यसि ? सः न अमिलत् ।

७ स इदानीं जलं मुञ्चति । मेघाः आकाशात् जलं मुञ्चन्ति । त्वं तं पशुं कदा मोक्ष्यसि ?

८ त्वं स्वकीयं गृहं कदा लेप्स्यसे ? अहं तत्स्थानं न लिम्पामि । स एव लिम्पतु ।

९ मनुष्यः ध्यानेन सुखं विन्दते । आत्मना विन्दते वीर्यम् । विद्यया विन्दतेऽमृतम् ।

१० स उद्याने वृक्षेभ्यः जलं सिञ्चति । त्वमपि तथैव जलं सिञ्चस्व । वद, त्वं कदा जलं सेक्ष्यसे ?

The Students should practise to make such sentences. Here ends the section of the 6th conjugational roots. Now we show the forms of the 4th conjugation.

Lesson– 4

रामायणम्

एवं विराधं राक्षसं हत्वा ते शरभंगस्याश्रमं जग्मुः । स तु तपोधनो रामं दृष्ट्वोवाच– 'हे नरव्याघ्र रामचंद्र ! तवागमनस्य वृत्तान्तं श्रुत्वा, त्वामतिथिमदृष्ट्वा ब्रह्मलोकं न गच्छामि, इति निश्चयो मया कृतः । अतस्त्वां द्रष्टुकाम एवाहं स्थितोऽत्र ।'

Sri Vidyabharathi Foundation, Bangalore

CC-O. In Public Domain. Digitized by eGangotri

इत्युक्त्वा रामं संपूज्य, तस्यातिथ्यं कृत्वा स्वयमचिरादेवाग्निं प्रविवेश ।

ततो बहस्तापसा राममभिगम्योचुः 'महानयं ब्राह्मणभूयिष्ठो वानप्रस्थगणो राक्षसैरनाथवद्धन्यते । अतोऽस्माकं त्वमेव नाथः । एहि पश्य । घोरैः राक्षसैर्महत् कदनं कृतम् । एवं तपस्विनां दुःखं न वयं मृष्यामः । त्वां च वयं सर्वेऽपि रक्षणार्थं समुपस्थिताः ।'

तापसानां वचनं श्रुत्वा राम उवाच- 'भो भो विप्राः ! मम वनवासो भवतां दुःखविनाशाय तथा च भवतां रक्षणायैवास्ति । अतो भवद्भिर्भयं न कर्तव्यम् । अहं शीघ्रमेव सर्वान् राक्षसान् नाशयिष्यामि ।' इति ।

ततः सीतारामलक्ष्मणास्तैः सर्वैरपि द्विजैः सह ऋषेः सुतीक्ष्णस्याश्रमपदं जग्मुः । अग्रतो रामो, मध्ये सीता, पृष्ठतो धनुष्पाणिर्लक्ष्मणश्चेति क्रमेण ते सर्वेषां तपस्विनामाश्रमाजग्मुः । तत ऊर्ध्वं रामोऽगस्त्याश्रमं सीतया लक्ष्मणेन च सह गतः ।

किंचिद् दूरं गत्वा रामोऽगस्त्याश्रमं ददर्श । तत्र गत्वा महाबाहू रामः सूर्यसममगस्त्यमुनिं दृष्ट्वा तं मुनिमभिवाद्य तत्रैव कृताञ्जलिस्तस्थौ ।

मुनिश्रेष्ठोऽगस्त्यो राममुवाच- 'भवान् मम पूज्योऽतिथिर्मान्यश्च । ममाश्रमे विश्वकर्मणा निर्मितं हेमवज्रविभूषितं दिव्यं चापं विद्यते । ब्रह्मणा दत्ताश्च शरोत्तमा अत्र सन्ति । अक्षय्यसायकौ तूणीरौ च । रजतकोशश्च असिरस्ति । हे राम ! तव जयाय एतान् प्रतिगृह्णीष्व । तत्सर्वं श्रेष्ठमायुधजातं रामाय दत्वाऽगस्त्यो रामं पुनरब्रवीत् । इतो द्वियोजनादूर्ध्वं पंचवटीति विश्रुतो देशः । तत्र गत्वा स्वकीयं आश्रमं कुरु । स एव प्रदेशो यत्र त्वया अत ऊर्ध्वं वस्तव्यम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अथैवं पञ्चवटीं गच्छन्रघुनंदनो महाकायं भीमपराक्रमं गृध्रं दृष्टवान्। तं गृध्रं दृष्ट्वा तौ महाभागौ रामलक्ष्मणौ तं राक्षसं मेनाते। 'को भवान्' इति पृष्टस्तु स गृध्र उवाच–'वत्स राम। ममात्मनः पितुर्वयस्यं विधि।' इति। पूजयित्वा पितृसखं गृध्रं राघवस्तस्य कुलं नाम च पप्रच्छ। स आचचक्षे। प्रजापतेर्दक्षस्य षष्टिर्दुहितरः। तासां अष्टौ कश्यपः प्रतिजग्राह। तासु ताम्रायाः शुकी नाम्नी एकतमा कन्यका बभूव। तस्याः पौत्रीः विनतानाम्न्यासीत्। विनतयाः पुत्रयोर्गरुडारुणयोर्मध्येऽरुणादहं जातः। जटायुरिति मे नाम। संपातिश्च ममाग्रजः। सोऽहं यदीच्छासि ते सहायको भविष्यामि। सलक्ष्मणे त्वयि बहिर्यातेऽहं सीतां रक्षिष्ये। इति।' एवं जटायुषा कथितं वृत्तान्तं रामः शुश्राव। श्रुत्वा च तं पितुर्मित्रं ज्ञात्वा पूजयामास।

ततस्तेन पक्षिणा सार्धं पञ्चवटीं गत्वा रामलक्ष्मणौ रम्ये गोदावरी-प्रदेशे यथा कथितमगस्त्येन तथाऽऽश्रमं चक्रतुः। बहुफले तस्मिन्प्रदेशे सह सीतया रामलक्ष्मणौ सुखेन कंचित्कालं न्यवसताम्।

अथ कदाचिद् दशग्रीवस्य रक्षसो भगिनी शूर्पणखा देवतोपमं रामं विलोक्य तत्रागता। तं रामं दृष्ट्वा सा राक्षसी काममोहिता बभूव। तां दृष्ट्वा रामोऽपि स्मितपूर्वमब्रवीत्। 'कृतदारोऽस्मि। इयं मम दयिता भार्या सीता। अतो मम भ्रातरं भज।' एतच्छ्रुत्वा रामं विसृज्य राक्षसी लक्ष्मणं प्राप्ता। तामागतां लक्ष्मणोऽब्रवीत्। 'कथं दासस्य मे भार्या भूत्वा त्वं दासी भवितुमिच्छसि? परवशोऽहम्। मम भ्राता राम एव त्वां योग्यः भविष्यति। गच्छ तं प्रति।'

सा पुनः रामं गत्वोवाच। 'एवं भूतां ते मानुषीं भार्यां भक्षयिष्यामि। निःसपत्ना भूत्वा त्वया सह चरिष्यामि।' तच्छ्रुत्वा कुपितो रामो लक्ष्मणमब्रवीत्। 'अनार्यैः सहार्यैः कथंचनैव परिहासो नैव कार्यः। अलं परिहासेन।'

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

लक्ष्मणस्तु तच्छ्रुत्वा खड्गमुद्धृत्य तस्याः शूर्पणखायाः कर्णनासिके चिच्छेद। सा तु शूर्पणखा तदा विस्वरं विनद्य यथागतं वनं प्रदुद्राव। सा ततो रुधिरं विक्षरन्ती घोरदर्शना शूर्पणखा भ्रातुः खरस्य स्थानं गत्वा सर्वं वृत्तान्तं शशंस।

एवंविधां भगिनीं शूर्पणखां दृष्ट्वा खरः खरतरं वाचं स्वभ्रातरं दूषणनामानमुवाच। 'हे भ्रातः! चित्तानुवर्तिनां मम राक्षसानां चतुर्दश-सहस्राणि सज्जीकुरु इति।' एवं ब्रुवाणस्य तस्यैवं दूषण आचचक्षे। 'युक्तो महारथः सदश्वैः।' निर्यातानि च घोराणां राक्षसानां चतुर्दश सहस्राणि।'

तानागतान्राक्षसान् रामो ददर्श। रामोऽपि चापमुद्यम्य ज्याघोषेण दिशः पूरयन् तत्रैव सज्जीभूत्वा स्थितः। क्रुद्धा निशाचरा रामं नानाविधैः शस्त्रैरभ्यवर्षन्त। रामस्य शरा अपि राक्षसानां प्राणानाददुः। क्रमेणैकेनैव शरेण रामेण राक्षसानां चतुर्दश-सहस्राणि हतानि।

राक्षसानां वधादूर्ध्वं रामस्तत्रैव सीतया सह लक्ष्मणेन च सह उवास।

Meaning of the words

नरव्याघ्रः = Best of men	प्रतिजग्राह = married
धनुष्पाणिः=with bow in hand	पौत्री = grand daughter
कृताञ्जलिः = with folded hands	न्यवसताम् = lived
हेमवज्रविभूषितः = adorned with gold and gems	कृतदारः = he who has married

×

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अक्षय्यसायकः = never ending arrows
रजतकोशः = silver sheathe of a sword
आयुधजातम् = group of weapons
द्वियोजनम् = two yojanas (unit of distance)
वयस्यः = a friend
पितृसखः = a friend of the father
दयिता = consort (female)
परवशः = dependent on others
कथंचन = somehow
अलं = enough
विस्वरं = hard tune
खरतरं = very hard
निर्यात = gone
सज्जीभूतः = Ready
आददुः = took

Lesson– 5

4th conjugation परस्मैपदी Root

Jnst as 'अ' is inserted in the 1st conjugation, 'अय' is inserted in the 10th conjugation, 'अ' is inserted in the 6th conjugation, so also 'य' is inserted in the 4th conjugation. For example see—

1 1st conjugation = वद् + अ + ति = वदति।
2 10th conjugation = भक्ष् +अय + ति = भक्षयति।
3 6th conjugation = विश् + अ + ति = विशति।
4 4th conjugation = क्रुध् + य + ति = क्रुध्यति।

The students should remember these signs. These are the conjugational signs. These are called विकरण. Now we show the method of the 4th conjugation. The students

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

might have understood the form of the root क्रुध्, i e. क्रुध्यति as given above. 'य' is added before ति, and the rest of the form is like that of the 1st conjugation.

4th conjugation परस्मैपदी Roots

'अस्' = (to throw)

१ लट् = (present) = १ अस्यति, अस्यतः, अस्यन्ति। २ अस्यसि, अस्यथः, अस्यथ। ३ अस्यामि, अस्यावः, अस्यामः ॥

'क्रुध्' = (to be angry)

२ लिट् = (past perfect) = १ चुक्रोध, चुक्रुधतुः, चुक्रुधुः। २ चुक्रोधिथ, चुक्रुधथुः, चुक्रुध। ३ चुक्रोध, चुक्रुधिव, चुक्रुधिम।

'क्लम्' = (to be tired)

३ लुट् = (1st future) = १ क्लमिता, क्लमितारौ, क्लमितारः। २ क्लमितासि, क्लमितास्थः, क्लमितास्थ। ३ क्लमितास्मि, क्लमितास्वः, क्लमितास्मः ॥

'क्रुध्' = (to be angry)

४ लृट् = (simple future) = १ क्रोधिष्यति, क्रोधिष्यतः, क्रोधिष्यन्ति। २ क्रोधिष्यसि, क्रोधिष्यथः, क्रोधिष्यथ। ३ क्रोधिष्यामि, क्रोधिष्यावः, क्रोधिष्यामः ॥

५ लेट् = This is only used in the vedas, not in common language.

'कुप्' = (to be angry)

६ लोट् = (Imperative) = १ कुप्यतु, कुप्यताम्, कुप्यन्तु। २ कुप्य, कुप्यताम्, कुप्यत। ३ कुप्यानि, कुप्याव, कुप्याम ॥

७ लङ् = (Past imperfect) = १ अकुप्यत्, अकुप्यताम्, अकुप्यन्। २ अकुप्यः, अकुप्यतम्, अकुप्यत। ३ अकुप्यम्, अकुप्याव, अकुप्याम ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

८ लिङ् = (potential) = १ कुप्येत्, कुप्येताम्, कुप्येयुः । २ कुप्येः, कुप्येतम्, कुप्येत । ३ कुप्येयम्, कुप्येव, कुप्येम ॥

(Benedictive) = १ कुप्यात्, कुप्यास्ताम्, कुप्यासुः । २ कुप्याः, कुप्यास्तम्, कुप्यास्त । ३ कुप्यासम्, कुप्यास्व, कुप्यास्म ॥

९ लुङ् = (Aorist) = १ अकुपत्, अकुपताम्, अकुपन् । २ अकुपः, अकुपतम्, अकुपत । ३ अकुपम्, अकुपाव, अकुपाम ॥

१० लृङ् = (conditional) = १ अकोपिष्यत्, अकोपिष्यताम्, अकोपिष्यन् । २ अकोपिष्यः, अकोपिष्यतम्, अकोपिष्यत । ३ अकोपिष्यम्, अकोपिष्याव, अकोपिष्याम ॥

Now frame the forms of the following in this way.

4th conjugational परस्मैपदी root

अस् = (to throw) अस्यति । आस । असिता । असिष्यति ।

ऋध् = (to progress, to advance) ऋध्यति । आनर्ध । अर्धिता । अर्धिष्यति ।

कुप् = (to be angry) कुप्यति । चुकोप । कोपिता । कोपिष्यति ।

कृश् = (to be unable) कृश्यति । चकर्श । कर्शिता । कर्शिष्यति ।

क्रुध् = (to be angry) क्रुध्यति । चुक्रोध । क्रोद्धा । क्रोत्स्यति ।

क्लम् = (to be tired) क्लाम्यति । चक्लाम । क्लमिता । क्लमिष्यति ।

क्लिद् = (to get wet) क्लिद्यति । चिक्लेद । क्लेत्ता, क्लेदिता । क्लेत्स्यति, क्लेदिष्यति ।

क्षम् = (to bear) क्षाम्यति । चक्षाम । क्षमिता, क्षन्ता । क्षमिष्यति, क्षंस्यति ।

क्षिप् = (to throw) क्षिप्यति । चिक्षेप । क्षेप्ता । क्षेप्स्यति ।

क्षुध् = (to be hungry) क्षुध्यति । चुक्षोध । क्षोद्धा । क्षोत्स्यति ।

क्षुभ् = (to be angry, to be frightened) क्षुभ्यति । चुक्षोभ । क्षोभिता । क्षोभिष्यति ।

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

गुप् = (to conceal, to keep secret) गुप्यति । जुगोप । गोपिता । गोपिष्यति ।

गृध् = (to be greedy) गृध्यति । जगर्ध । गर्धिता । गर्धिष्यति ।

छो = (to cut) छयति । चच्छौ । छाता । छास्यति ।

जॄ = (to become old) जीर्यति । जजार । जरिता, जरीता । जरिष्यति, जरीष्यति ।

तम् = (to wish) ताम्यति । ततान । तमिता । तमिष्यति ।

तुष् = (to be satisfied) तुष्यति । तुतोष । तोष्टा । तोक्ष्यति ।

संस्कृत–वाक्यानि

१ युद्धे वीरः शरान् अस्यति । त्वं बाणान् अक्षिप्स्यसि किम् ? सः शस्त्राणि शत्रूणां उपरि अस्यतु ।

२ तौ कुप्यतः । ते कुप्यन्ति । स इदानीं कुप्यतु । स तदा तथा न अकुप्यत् यथा त्वं अकुपः । यदि स अकोपिष्यत् तर्हि अहमपि कोपिष्यामि ।

३ यूयं कृश्यथ । किमर्थं ते चकृशुः ? त्वं कर्शिष्यसि किम् ? सः अकृशत् ।

४ सर्वे प्राणिनः क्लाम्यन्ति । कः न क्लामिष्यति ? यदि सः अक्लामिष्यत् तर्हि त्वमपि न गच्छ ।

५ यूयं वस्त्राणि क्षिपत । सः वस्त्रं क्षिपतु । त्वं इदानीं बाणान् क्षेप्स्यसि किम् ?

६ बालकः इदानीं क्षुध्यति । त्वं नैव क्षुध्यसि । स कदा क्षोत्स्यति ? स नाक्षुध्यत् ।

७ वीरः न कदापि गृध्यति । स किमर्थं गर्धिष्यति ? अहं कदापि नैव गर्धिष्यामि ।

८ ईश्वरः भक्त्या तुष्यति । राजा बलेन तुष्यति । त्वं कथं तुष्यसि ? अहं धनेन नातुष्यम् ।

Let the students construct sentences this way and improve their Sanskrit.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 6

4th conjugation परस्मैपदी roots

The make it easy to the students, we show some of the forms of the root of the 4th conjugation.

तृप् = (to be satisfied)

१ लट् = (Present) = १ तृप्यति, तृप्यतः, तृप्यन्ति । २ तृप्यसि, तृप्यथः, तृप्यथ । ३ तृप्यामि, तृप्यावः, तृप्यामः ।

२ लङ् = (Past imperfect) = १ अतृप्यत्, अतृप्यताम्, अतृप्यन् । २ अतृप्यः, अतृप्यतम्, अतृप्यत । ३ अतृप्यम्, अतृप्याव, अतृप्याम ।

३ लोट् = (Imperative) = १ तृप्यतु, तृप्यताम्, तृप्यन्तु । २ तृप्य, तृप्यतम्, तृप्यत । ३ तृप्यानि, तृप्याव, तृप्याम ।

४ लिङ् = (Potential) = १ तृप्येत्, तृप्येताम्, तृप्येयुः । २ तृप्येः, तृप्येतम्, तृप्येत । ३ तृप्येयम्, तृप्येव, तृप्येम ।

(Benedictive) = १ तृप्यात्, तृप्यास्ताम्, तृप्यासुः । २ तृप्याः, तृप्यास्तम, तृप्यास्त । ३ तृप्यासम्, तृप्यास्व, तृप्यास्म ॥

'त्रस्' = (to be frightened)

५ लृट् = (Simple future) = १ त्रसिष्यति, त्रसिष्यतः, त्रसिष्यन्ति । २ त्रसिष्यसि, त्रसिष्यथः, त्रसिष्यथ । ३ त्रसिष्यामि; त्रसिष्यावः त्रसिष्यामः ।

'नृत्' = (to dance)

६ लोट् = (Past perfect) = १ ननर्त, ननृततुः, ननृतुः । २ ननर्तिथ, ननृतथुः, ननृत । ३ ननर्त, ननृतिव, ननृतिम ॥

In this way students should frame the forms of the following roots:

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

4th conjugation परस्मैपदी roots

तृप् = (to be satisfied) तृप्यति । ततर्प । तर्पिता, तप्ता । तर्पिष्यति । तप्स्यति ।

तृष् = (to be thirsty) तृष्यति । ततर्ष । तर्षिता । तर्षिष्यति ।

त्रस् = (to be frightened) त्रस्यति । तत्रास । त्रसिता । त्रसिष्यति ।

दम् = (to calm, to keep under control) दाम्यति । ददाम । दमिता । दमिष्यति ।

दस् = (to become extinct) दस्यति । ददास । दसिता । दसिष्यति ।

दिव् = (to play) दीव्यति । दिदेव । देविता । देविष्यति ।

दुष् = (to get spoilt) दुष्यति । दुदोष । दोष्टा । दोक्ष्यति,

दृप् = (to be proud) दृप्यति । ददर्प । दर्पिता, दर्प्ता, द्रप्ता । दर्पिष्यति, दर्प्स्यति, द्रप्स्यति ।

दो = (to cut to pieces) द्यति । ददौ । दाता । दास्यति ।

द्रुह् = (to hate, to do a bad turn) द्रुह्यति । दुद्रोह । द्रोहिता, द्रोग्धा, द्रोढा । द्रोहिष्यति, द्रोक्ष्यति ।

नश् = (to become extinct) नश्यति । ननाश । नशित, नंष्टा । नशिष्यति, नंक्ष्यति ।

नृत् = (to dance) नृत्यति । ननर्त । नर्तिता । नर्तिष्यति, नर्त्स्यति ।

पुष् = (to become strong) पुष्यति । पुपोष । पोष्टा । पोक्ष्यति ।

भ्रम् = (to swing, to go about) भ्राम्यति । बभ्राम । भ्रमिता । भ्रमिष्यति ।

भ्रंश् = (to fall) भ्रश्यति । बभ्रंश । भ्रंशिता । भ्रंशिष्यति ।

मद् = (to enjoy) माद्यति । ममाद । मदिता । मदिष्यति ।

मिद् = (to love) मेद्यति । मिमेद । मेदिता । मेदिष्यति ।

मुह् = (to faint) मुह्यति । मुमोह । मोहिता । मोहिष्यति ।

मृग् = (to search) मृग्यति । ममर्ग । मर्गिता । मर्गिष्यति ।

मृष् = (to bear) मृष्यति । ममर्ष । मर्षिता । मर्षिष्यति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

यस् = (to try) यस्यति । ययास । यसिता । यसिष्यति ।
राध् = (to advance, to progress) राध्यति । रराध । राद्धा । रात्स्यति ।
रिस् = (to be destroyed, to be extinct) रिष्यति । रिरेष । रेषिता । रेषिष्यति ।
रुष् = (to kill) रुष्यति । रुरोष । रोषिता, रोष्टा । रोषिष्यति ।
लुप् = (to become senseless) लुप्यति । लुलोप । लोपिता । लोपिष्यति ।
लुभ् = (to be greedy) लुभ्यति । लुलोभ । लोभिता, लोब्धा । लोभिष्यति ।
व्यध् = (to beat) विध्यति । विव्याध । व्यद्धा । व्यत्स्यति ।
व्रीड् = (to be shy, to be modest) व्रीडयति । विव्रीड । व्रीडिता । व्रीडिष्यति ।
शम् = (to be calm) शाम्यति । शशाम । शमिता । शमिष्यति ।
शुध् = (to be clean, pure) शुध्यति । शुशोध । शोद्धा । शोत्स्यति ।
शुष् = (to be dry) शुष्यति । शुशोष । शोष्टा । शोक्ष्यति ।
शो = (to make thin) श्यति । शशौ । शाता । शास्यति ।
श्रम् = (to be tired) श्राम्यति । शश्राम । श्रमिता । श्रमिष्यति ।
श्लिष् = (to embrace) श्लिष्यति । शिश्लेष । श्लेष्टा । श्लेक्ष्यति ।
ष्ठिव् = (to spit) ष्ठीव्यति । तिष्ठेव । ष्ठेविता । ष्ठेविष्यति ।
सह् = (to be satisfied) सह्यति । ससाह । सहिता । सहिष्यति ।
सिध् = (to be ready) सिध्यति । सिषेध । सेद्धा । सेत्स्यति ।
सीव् = (to sew) सीव्यति । सिषेव । सेविता । सेविष्यति ।
स्निह् = (to love) स्निह्यति । सिस्नेह । स्नेहिता । स्नेहिष्यति ।
स्विद् = (to sweat) स्विद्यति । सिष्वेद । स्वेत्ता । स्वेत्स्यति ।
हृष् = (to be pleased) हृष्यति । जहर्ष । हर्षिता । हर्षिष्यति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

संस्कृत–वाक्यानि

१ कथां श्रुत्वा श्रुत्वा अहं न तृप्यामि । स त्वां नैव तर्पिष्यति । परशुरामस्य पितरः ततृपुः । देवाः तृप्यन्तु ।

२ राक्षसाः अनेन कारणेन त्रस्यन्ति । के एवं न त्रसिष्यन्ति ? भवन्तः किमर्थं त्रसन्ति ? यूयं सर्वे अपि मा त्रस्यथ ।

३ सर्वे बालकाः इदानीं दीव्यन्ति । यूयं कदा देविष्यथ ? वयं अद्य नैव देविष्यामः । स मा दीव्यतु । अक्षैर्मा दीव्यः ।

४ शत्रवः द्रुह्यन्ति, ते सर्वे द्रुह्यन्तु, किन्तु अहं कदापि नैव द्रुह्यामि । त्वमपि द्रोहिष्यसि किम् ?

५ सर्वे प्राणिनः नश्यन्ति, सर्वं जगत् नश्यति । अपि तु आत्मा नैव नश्यति ।

६ नटाः नृत्यन्ति । बालकाः नाट्यशालायां नृत्यन्तु, परन्तु ते अन्यत्र न नृत्येयुः । अहं गृहे एव नर्तिष्यामि ।

७ पुरुषः अन्नेन पुष्यति । शरीरं अन्नेन विना न पुष्यति । त्वं कथं पोक्ष्यसि ? स एधेन पुष्यतु ।

८ राजा राज्यात् भ्रश्यति । तारकाः आकाशाद् भ्रश्यन्ति । भृत्यः प्रासादात् भ्रश्यति । त्वं तस्मात् स्थानान्मा भ्रश्य ।

९ त्वं लुभ्यसि । अहं कदापि नैव लुभ्यामि । मूर्खाः लुभ्यन्तु । ज्ञानिनः मा लुभ्यन्तु ।

१० शरीराणि जलेन शुध्यन्ति । मनः सत्येन शुध्यति । ज्ञानेन बुद्धिः शुध्यति । तपसा आत्मा शुध्यतु ।

११ यत् त्वया प्रतिपादितं तत् कथं सिध्यति ? त्वं स्वसिद्धान्तं सेत्स्यसि किम् ?

१२ नराः विजयेन हृष्यन्ति । सर्वेऽपि धनप्राप्त्या हर्षिष्यन्ति । पुत्रस्य मुखं दृष्ट्वा मातापितरौ हृष्यतः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 7

4th Cojugational आत्मनेपदी Root

The forms of these roots are framed as under–

'क्लिश्' = (to suffer hardship)

१ लट् = (Present) = १ क्लिश्यते, क्लिश्येते, क्लिश्यन्ते । २ क्लिश्यसे, क्लिश्येथे, क्लिश्यध्वे । ३ क्लिश्ये, क्लिश्यावहे, क्लिश्यामहे ॥

'क्लिद्' = (to be grieved)

२ लङ् = (past imperfect) = १ अक्लिश्यत, अक्लिश्येताम्, अक्लिश्यन्त । २ अक्लिश्यथाः, अक्लिश्येथाम्, अक्लिश्यध्वम् । ३ अक्लिश्ये, अक्लिश्यावहि, अक्लिश्यामहि ॥

'तप्' = (to be enriched)

३ लोट् = (Imperative) = १ तप्यताम्, तप्येताम्, तप्यन्ताम् । २ तप्यस्व, तप्येथाम्, तप्यध्वम् । ३ तप्यै, तप्यावहै, तप्यामहै ॥

'पुर्' = (to fill)

४ लिङ् = (Potential) = १ पूर्येत, पूर्येयाताम्, पूर्येरन् । २ पूर्येथाः पूर्येयाथाम्, पूर्येध्वम् । ३ पूर्येय, पूर्येवहि, पूर्येमहि ॥

'युज्' = (to meditate upon)

५ लिट् = (Past perfect)= १ युयुजे, युयुजाते, युयुजिरे २ युयुजिषे, युयुजाथे, युयुजिध्वे । ३ युयुजे, युयुजिवहे, युयुजिमहे ॥

'सृज्' = (to give up)

६ लृट् = (Simple future) = १ स्रक्ष्यते, स्रक्ष्येते, स्रक्ष्यन्ते । २ स्रक्ष्यसे, स्रक्ष्येथे, स्रक्ष्यध्वे । ३ स्रक्ष्ये, स्रक्ष्यावहे, स्रक्ष्यामहे ॥

4th Conjugation आत्मनेपदी roots

क्लिश् = (to suffer hardship) क्लिश्यते । चिक्लिशे । क्लेशिता । क्लेशिष्यते ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

क्षी = (to kill or trouble) क्षीयते । चिक्षिये । क्षेता । क्षेष्यते ।
खिद् = (to be grieved) खिद्यते । चिखिदे । खेत्ता । खेत्स्यते ।
जन् = (to be born) जायते । जज्ञे । जनिता । जनिष्यते ।
डी = (to fly) डीयते । डिड्ये । डयिता । डयिष्यते ।
तप् = (to be enriched) तप्यते । तेपे । तप्ता । तप्स्यते ।
दीप् = (to light, to cause to shine) दीप्यते । दिदीपे । दीपिता । दीपिष्यते ।
दू = (to be grieved) दूयते । दुदुवे । दविता । दविष्यते ।
पत् = (to be enriched) पत्यते । पेते । पतिता । पतिष्यते ।
पद् = (to go) पद्यते । पेदे । पत्ता । पत्स्यते ।
पी = (to drink) पीयते । पिप्ये । पेता । पेष्यते ।
पूर् = (to fill) पूर्यते । पुपूरे । पूरिता । पूरिष्यते ।
प्री = (to love) प्रीयते । पिप्रिये । प्रेता । प्रेष्यते ।
बुध् = (to know) बुध्यते । बुबुधे । बोद्धा । भोत्स्यते ।
मन् = (to contemplate) मन्यते । मेने । मन्ता । मंस्यते ।
युज् = (to meditate upon) युज्यते । युयुजे । योक्ता । योक्ष्यते ।
युध् = (to fight) युध्यते । युयुधे । योद्धा । योत्स्यते ।
विद् = (to be) विद्यते । विविदे । वेत्ता । वेत्स्यते ।
सू = (to give birth) सूयते । सुषुवे । सविता । सोष्यते, सविष्यते ।
सृज् = (to leave, to give up) सृज्यते । ससृजे । स्रष्टा । स्रक्ष्यते ।

Now the students can make use of these roots.

संस्कृत–वाक्यानि

१ त्वं किमर्थं एवं क्लिश्यसे ? स क्लिश्यतां परन्तु त्वं मा क्लिश्यस्व । लोकहेतोः राजा क्लिश्यते ।

२ ब्राह्मणः तत्र खिद्यते । त्वं खेत्स्यसे किम् ? अजायमानः बहुधा विजायते । काष्ठात् अग्निः जज्ञे ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

३ विश्वामित्रः ऋषिषु दीप्यते । अहं दीपेन तव दीपं दीपिष्ये । स दीप्यताम् ।

४ यथा स बुध्यते तथा त्वं न बुध्यसे । तव शिष्यः यथा बुबुधे तथा स बालः न बुध्यते ।

५ अहं मन्ये तत्रैव एतत् राज्यमिति । त्वं किं मन्यसे ? यदि त्वं एवं मंस्यसे, तर्हि अहं किमपि न वदिष्यामि ।

६ यदा त्वं युध्यसे तदा तव पदातयः कुत्र भवन्ति ? यदि त्वं इच्छसि तर्हि मया सह युध्यस्व ।

७ तव मित्रं अत्र विद्यते किम् ? मम गृहे महाभारतस्य पुस्तकं विद्यते ।

८ त्वं अस्मिन् देशे किमर्थं तप्यसे ? सः अपि तथा न तप्यते यथा त्वं तप्यसे ।

९ पक्षिणः आकाशे डीयन्ते । उष्णकाले मयूराः आकाशे किमर्थं न डीयन्ते । स डयिष्यते किम् ?

The students can frame the forms of the roots mentioned before in this way and use them in sentences. Here end the 4th Conjugational common to परस्मैपद as well as आत्मनेपद.

4th Conjugation उभयपदी root

The forms of these will be framed both in the परस्मैपद as well as आत्मनेपद.

'शुच्' (to be pure

१ लट् (Present)

परस्मैपदी = १ शुच्यति, शुच्यतः, शुच्यन्ति । २ शुच्यसि, शुच्यथः, शुच्यथ । ३ शुच्यामि, शुच्यावः, शुच्यामः ।

Sri Sringeri Sharada Peetham Collection. CC-O. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

आत्मनेपदी = १ शुच्यते, शुच्येते, शुच्यन्ते। २ शुच्यसे, शुच्येथे, शुच्यध्वे। ३ शुच्ये, शुच्यावहे, शुच्यामहे ॥

(२) 'लङ्' = (Imperfect past)

परस्मैपदी = १ अशुच्यत् अशुच्यताम्, अशुच्यन्। २ अशुच्यः, अशुच्यतम्, अशुच्यत। ३ अशुच्यम्, अशुच्याव, अशुच्याम ॥

आत्मनेपदी = १ अशुच्यत, अशुच्येताम्, अशुच्यन्त। अशुच्यथाः, अशुच्येथाम्, अशुच्यध्वम्। ३ अशुच्ये, अशुच्यावहि, अशुच्यामहि ॥

(३) 'लोट्' = (Imeperative)

परस्मैपदी = १ शुच्यतु, शुच्यताम्, शुच्यन्तु। २ शुच्य, शुच्यतम्, शुच्यत। ३ शुच्यानि, शुच्याव, शुच्याम ॥

आत्मनेपदी = १ शुच्यताम्, शुच्येताम्, शुच्यन्ताम्। २ शुच्यस्व, शुच्येथाम्, शुच्यध्वम्। ३ शुच्ये, चुच्यावहै, शुच्यामहै ॥

(४) 'लिङ् = (Potenial mood)

परस्मैपदी = १ शुच्येत्, शुच्येताम्, शुच्येयुः। २ शुच्येः, शुच्येतम्, शुच्येत। ३ शुच्येयम्, शुच्येव, शुच्येम ॥

आत्मनेपदी = १ शुच्येत, शुच्येयाताम्, शुच्येरन्। २ शुच्येथाः, शुच्येयाथाम्, शुच्येध्वम्। ३ शुच्येय शुच्येवहि, शुच्येमहि ॥

In this way other forms also can be framed.

4th conjugational उभयपदी Root

रञ्ज् = (to colour) रज्यति-ते। ररञ्ज-ररञ्जे। रंक्ता। रंक्ष्यति-ते।

शुच् = (to make pure) शुच्यति-ते। शुशोच-शुशुचे। शोचिता। शोचिष्यति-ते।

संस्कृत-वाक्यानि

१ रंजयिता वस्त्राणि रज्यति। त्वं किं न वस्त्रं रज्यसे ? अहं नैव रंक्ष्यामि।

२ त्वं सर्वं शुच्यसे। अहं न शुच्ये। वयं शुच्यामहे त्वं शोचिष्यसि। युवां शोचिष्यथः। यूयं शोचिष्यथ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Here ends the 4th Conjugational discussion. Now the 2nd Conjugational discussion will follow. Please read the sentences now.

Here we give some joined sentences

१ त्वं किमिच्छासि ? तौ किमिच्छतः ? तेऽत्र क्रीडितुमिच्छन्ति किम् ? ते किमर्थमत्र क्रीडितुं नेच्छन्ति ? सर्वे बालका अत्रैवेदानीं क्रीडन्तु ।

२ बालको बालकेन सह क्रीडति । ते सर्वे बालकास्तत्र तैः सह क्रीडन्तु । सर्वे मनुष्याः सर्वैर्बालकैः सहात्रैवेदानीं क्रीडन्तु ।

३ सा बालिका पुष्पमालां गुम्फति । तत्रेदानीं सर्वाः स्त्रियः किं कुर्वन्ति ? किं न स्त्रियोऽपि बालिकाभिः सह पुष्पाणां मालाः गुंफितुमिच्छन्ति ?

४ वायुर्वनस्थान्वृक्षान्धुवति । सर्वेऽपि प्राणिनो जलेनोदरं पृणन्ति ।

Lesson– 8

रामायणम्

ततः शूर्पणखा दूषणं खरं त्रिशिरसं च रामेण हतं दृष्ट्वा परमोद्विग्ना रावणपालितां लंकां जगाम, ददर्श च दशग्रीवम् । तं रावणमुपगम्य भयविह्वला शूर्पणखाऽब्रवीत् । 'हे रावण ! त्वं कामभोगेषु प्रसक्तः बोद्धव्यं घोरं भयं नाववुध्यसे ! कामवृत्तं लुब्धं ग्राम्येषु भोगेषु सक्तं महीपतिं प्रजाः बहु न मन्यन्ते । एकेन रामेण राक्षसानां चतुर्दशसहस्राणि हतानि, खरोऽपि दूषणेन सह हतः । दण्डकारण्यं निर्भयं कृतम् । ऋषयो निर्भयाः जाताः । कथं त्वं सर्वमेतद् नाववुध्यसे ?

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

एतच्छ्रुत्वा रावणः संक्रुद्धस्तां पुनः पप्रच्छ । 'कोऽयं रामः ? किं वीर्यः ? तस्य किं रूपम् ? किमर्थं प्रविष्टो दुर्गमं दण्डकारण्यम् ? किं च तस्यायुधं येन राक्षसा हताः ? केन च त्वं एवं विरूपिता ?' इति ।

रावणस्य भाषणं श्रुत्वा क्रोधमूर्च्छिता शूर्पणखा रामलक्ष्मणयोः पराक्रममाख्यातवती । सा रावणं पुनरुवाच– 'हे देशमुख ! रामस्य धर्मपत्नी सीता नाम विशालाक्षी सुंदरी, तथा रूपा नारी मया कुत्रापि न दृष्टपूर्वा । यादृशी सीता तादृशी न देवी, न गंधर्वी, न यक्षी, न किन्नरी । अतः सा तवैवानुरूपा भार्या । त्वं च तस्या योग्यः पतिः । अहं तामानेतुमुद्यताऽस्मि, किन्तु क्रूरेण लक्ष्मणेन विरूपिताऽस्मि ।' इति ।

श्रुत्वा तच्छूर्पणखावचनं राक्षसाधिपो रावणो रथशालां गत्वा 'रथः संयुज्यताम्' इति सूतं संचोदयामास ।

रावणो रथमास्थाय समुद्रस्य पारं गत्वा मारीचस्याश्रमं ददर्श । तत्र जटामण्डलधारिणं नियताहारं मारीचं नाम राक्षसं दृष्ट्वा उवाच— 'भवान् हि मे परमा गतिः । जनस्थाने मानुषेण त्रिशिरादूषणादयो राक्षसा हताः । मम भगिनी शूर्पणखाऽपि कर्णनासिकाछेदनेन विरूपिता । अतोऽस्य भार्यां जनस्थानादानयिष्यामि । तत्र मे सहायो भव । सीतायाः संमुखं सौवर्णो मृगो भूत्वा विचर । त्वं तु दृष्ट्वा सीता निःसंशयं अयं गृह्यतामिति भर्तारं लक्ष्मणं च कथयिष्यति । रामलक्ष्मणौ अपि त्वद्ग्रहणार्थं आश्रमाद् बहिर्गमिष्यतः । यदा ताभ्यां रामलक्ष्मणाभ्यां विहीनः आश्रमो भविष्यति, अहं तत्र प्रविश्य सीतामाहरिष्यामि ।

रावणस्यैतद्भाषणं श्रुत्वा महातेजा मारीचः प्रत्युवाच 'हे राजन् ! सुलभाः प्रियवादिनः । अप्रियस्य पथ्यस्य च श्रोता वक्ता च दुर्लभः । अयुक्ताचारश्चपलस्त्वं महावीर्यगुणोपेतं रामं न बुध्यसे । संक्रुद्धो रामो लोकानराक्षसान् कुर्यात् । त्वद्विधः काम-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वृत्तो हि राजा दुःशीलः पापमन्त्रितः स्वजनं राष्ट्रमात्मानं च हन्ति। दीप्तस्याग्नेर्ज्वालेव सा सीता धर्षयितुं न शक्या। परदारारक्षणात्तु नान्यन्महत्पातकं परतरम्। अतः स्वादारनिरतो भव। रक्ष स्वकुलं राक्षसांश्च।'

तन्मारीचस्य युक्तं वाक्यं रावणस्तु न प्रतिजग्राह। कालप्रेरितश्चाब्रवीत्- 'मारीच! निष्फलं वाक्यं किमर्थमेवं ब्रवीषि? स्वरघातिनस्तस्य रामस्य प्रिया भार्या सीता मयाऽवश्यमेव हर्तव्या। मादृशस्य राज्ञः प्रतिकूलो भूत्वा न कोऽपि सुखं प्राप्नोति। यदि त्वं ममैतत्कार्यं स्वेच्छया न कर्तुमिच्छसि तर्हि बलात्करिष्यसि।'

ततस्ताटिकासुतो मारीचस्तथेत्युवाच। तत उभौ अपि राघवस्याश्रमं जग्मतुः। मारीचो मृगो भूत्वा रामस्याश्रमद्वारि विचचार। तं सौवर्णमृगं रुचिरं दृष्ट्वा प्रहृष्टा सीता भर्तारं रामं लक्ष्मणं चाब्रवीत्- 'हे राम! पश्य सौवर्णं मृगम्। अहो अस्य रूपम्। अहो लक्ष्मीः स्वरसंपच्च शोभना। हे महाबाहो राम! आनयैनं। एष नः क्रीडार्थं भविष्यति।' इति।

एवं प्रचादितो रामो लक्ष्मणमुवाच। 'हे लक्ष्मण! इह त्वं सन्नद्धो भव! रक्ष तावत् सीताम्। यावदहमानयामि मृगम्। अप्रमत्तेन त्वया भाव्यम्, प्रयत्नेन रक्षितव्या च त्वया सीता।' इति।

इत्यादिश्य, उग्रपराक्रमो रामो चापं गृहीत्वा मृगमनुगतः। रामं अवेक्ष्यावेक्ष्य धावन्मृगो मुहुर्तादेव न ददृशे, मुहुर्दूरादेव प्रकाशते च रामस्तु तमुद्दिश्य प्रदीप्तं ब्रह्मास्त्रं मुमोच। स शरः मृगरूपस्य मारीचस्य हृदयं विभेद, तदा तत्रैव स न्यपतत्। प्राप्तकालं ज्ञात्वा तदा मरणसमये रामस्येवाक्रोशं चकार 'हा सीते! हा लक्ष्मण!' इति! एवमाक्रोशं कृत्वा तत्रैव ममार च।

तस्य तीव्रं शब्दं च श्रुत्वा रामो भयं आविवेश। तं शब्दं श्रुत्वा सीता कथं भवेत्? कथं वा लक्ष्मण! इति च मनसि विचारयामास।

Sri Vedabharathi Book Centre, Srirangam

CC-O. In Public Domain. Digitized by eGangotri

एवं मृगरूपं राक्षसं हत्वा त्वरमाण आश्रमाभिमुखं ससार।
अत्र सीता रामस्यार्तं शब्दं श्रुत्वा लक्ष्मणमाह 'गच्छ रामं जानीहि। आक्रन्दमानं भ्रातरं त्रातुमर्हसि।' इति।
भ्रातुराज्ञां स्मृत्वा न जगाम लक्ष्मणः। जनकात्मजा ततः क्रुद्धा तमुवाच 'यस्त्वमस्यामवस्थायां यन्नाभिगच्छसि भ्रातरं, नूनं मत्कृते लोभादेवात्र स्थितोऽसि।'
एवं ब्रुवन्तीं वैदेहीं लक्ष्मणोऽब्रवीत्-'हे देवि! ते भर्ता पन्नगासुरगन्धर्वदेवदानवराक्षसैरपि नैव जेतुं शक्यः। समरेऽवध्यो हि रामः। अतो मां नैवं वक्तुमर्हसि। अस्मिन्वने राघवं विना त्वां हातुं नोत्सहे। नान्यथा चिन्तयितुमर्हसि वैदेहि। महावने विवेधवाचो राक्षसा एवं व्याहरन्त्येव।' इति।
तथापि क्रुद्धा सीता संरक्तलोचना भूत्वा पुरुषं वाक्यमब्रवीत् 'अनार्य लक्ष्मण! हे नृशंस! कुलपांसन! मन्ये राघवस्य महद्व्यसनं तुभ्यं रोचत एव। नैतच्चित्रं यत् त्वद्विधेषु सपत्नेषु प्रच्छन्न चारेषु नृशंसेषु पापं भवेत्। सुदुष्टस्त्वम्। मन्ये मम हेतोरेव त्वमेकं राममनुगतोऽसि। भरतेनापि वा प्रयुक्तो भवेः। हे सौमित्रे! नैव तवोद्दिष्टं सिध्यति। कथं रामं भर्तारं प्राप्यान्यं जनं कामयेयम्। यदि इतो न गच्छसि रामरक्षणाय तर्हि त्वत्समक्षमेवात्र प्राणान्त्यजामि।' इति।
एवं पुरुषमुक्तो जितेन्द्रियो लक्ष्मणः प्राञ्जलिराह-'नोत्सहे वक्तुमस्योत्तरम्। हे सीते! स्त्रीषु न चित्रमेतद्वाक्यम्। स्वभाव एवैष नारीणाम्। भवती तु मम दैवतम्। इदं तु तव वाक्यं तत्तनारावसंनिभं न सहे श्रोतुम्। उपश्रृण्वन्तु ये साक्षिणः सर्वेऽपि वनचराः, पुरुष यथाऽहं वाक्यं त्वयोक्तोऽस्मि। स्त्रीत्वाद् दुष्टस्वभावेन मां भ्रातृवाक्ये व्यवस्थितमपि विशङ्कसे! अस्तु ते स्वस्ति। गच्छामि यत्र काकुत्स्थः।' इत्युक्त्वा खिन्नो भूत्वा लक्ष्मणो निष्क्रान्तः।

×

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

वृक्षवल्लीषु प्रच्छन्नो रावणस्तदा क्षिप्रमेव परिव्राजकरूपधृक् काषायवस्त्रधारी वैदेहीमभिचक्राम। रामस्याश्रममागत्य तत्र सीतां दृष्ट्वा ब्रह्मघोषमुदीरयन् सीतामेवमब्रवीत्- 'पतिकौशेय-वासिनि त्वं श्रीः शुभा वा लक्ष्मीरप्सरा वा काऽसि ? का त्वं ? देवता प्रतिभासि मे। कथं पुनस्त्वमिहागताऽसि ? राक्षसानामयं वासः।' इति।

एवं रावणेन संपृष्टा सीता सर्वं प्रोवाच वृत्तम्। सा तदमुवाच च- 'आगमिष्यति मे भर्ता पुष्कलं वन्यमादाय। स त्वं नाम च गोत्रं च कुलं च समाचक्ष्व। एकाकी च त्वं असिन्दण्डकारण्ये किं चरसि ?' इति।

स रावणः प्रत्युवाच- 'सदेवासुरमानुषा लोका येन वित्रा-सिताः सोऽहं रावणो नाम राक्षसेश्वरः। लङ्का नाम महापुरी गिरिमूर्धनि सागरमध्येऽस्ति, तत्र गत्वा मेऽग्रमहिषीभव।' इति।

अनादृत्य तस्य तद्वाक्यं कुपिता जनकात्मजा तं प्रत्युवाच—

'जितेन्द्रियमक्षोभ्यं राममेवानुव्रताऽस्मि। त्वं पुनर्जम्बूको भूत्वा सिंहीं मामिहेच्छसि ! नाहं शक्या त्वया स्प्रष्टुमपि।'

श्रुत्वा तत्सीतावाक्यं दशग्रीवः स्वकीयं वपुः सुमहच्चकार सीतां पुनर्बभाषे च- 'मन्ये, त्वया मम वीर्यपराक्रमा न श्रुतौ। अहं भुजाभ्यां पृथिवीमुद्वहेयम्। समुद्रमपि संपूर्णमपिबेयम्, रणे मृत्युमपि हन्याम्।' इति।

इत्युक्त्वा रावणः सीतां केशेषु हस्तेनैकेन जग्राह अपरेणोर्वोः। एवं गृहीता सा सीता भयार्ता विह्वलं चुक्रोश- 'हा राम, हा राम' इति। 'हा लक्ष्मण, हा लक्ष्मण' इति। एवं ह्रियमाणा सीता विललाप चैवम्- 'हा राम ! न जानीषे मां राक्षसेन ह्रिय-माणाम्। न पश्यसि मामधर्मेण ह्रियमाणाम् कथं न शाधि पाप-मेवं रावणम्। हन्त ! सकामा खलु कैकेयीदानीं संवृत्ता। हे राम ! पश्य माम्, रक्ष माम्।' इति।

एवं विलपन्तीं सीतां गृहीत्वा रावणो लंकां प्रस्थितः।

CC-O. Jangamwadi Math Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

Meanings of words

उद्विग्नः = grieved
पालिता = having been protected
बोद्धव्यम् = fit to be known
विव्हलः = grieved, pained
ग्राम्यः = pertaining to village, vulgar
आख्यातवती = said
नियताहारः = controlled diet (food)
पथ्यः = diet–that which is good
अयुक्ताचारः = of bad conduct
चपलः = fidgety.
पापमन्त्रितः = having been given bad counsel.
बलात् = by compulion
तथा = alright
लक्ष्मी = beauty
स्वरसंपत् = rich in tune
काकुत्स्थः = Rama
सन्नद्धः = Ready
त्वरमाणः = making haste.
ससार = went
पन्नगः = serpent
जेतुं = in order to conquer
हातुं = in order to give up
विविधवाचः = who knows mimicry
व्याहरन्ति = talk
परुषः = hard
नृशंसः = cruel
कुलपांसनः = degradation of the family
नाराचः = arrow
संनिभः = like, resembling.
वन्यः = born in forest

Compounds

१ रावणपालिता = रावणेन पालिता ।
२ कामभोगौ = कामश्च भोगश्च ।
३ विशालाक्षी = विशाले अक्षिणी यस्याः सा ।
४ दृष्टपूर्वा = पूर्वं दृष्टा ।
५ रथशाला = रथानां शाला ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

६ जटामंडलधारिन् = जटायाः मंडलं जटामंडलं । तत् धारयतीति जटामंडलधारी ।

७ नियताहारः = नियतः आहारः यस्य ।

८ कर्णनासिकाछेदनं = कर्णश्च नासिका च कर्णनासिके । तयोः छेदनम् ।

९ प्रियवादिन् = प्रियं वदति इति ।

१० अयुक्ताचारः = न युक्तः अयुक्तः । अयुक्तः आचारः यस्य सः ।

११ महावीर्यगुणोपेतः = वीर्यं च गुणश्च वीर्यगुणौ । महान्तौ च तौ वीर्यगुणौ च महावीर्यगुणौ । ताभ्यां उपेतः ।

१२ उग्रपराक्रमः = उग्रः पराक्रमो यस्य ।

१३ सरक्तलोचना = सरक्ते लोचने यस्याः ।

१४ काषायवस्त्रधारी = काषायं च तद्वस्त्रं च काषायवस्त्रं । तद् धारयतीति ।

Lesson– 9

1st, 4th, 6th and 10th conjugation roots have respectively, अ, य, अ and अय as विकरण suffixes (that which comes between the root and the tense suffix). But in the case of the 2nd conjugation there is no विकरण for all practical purposes; (i. e., the विकरण disappears when) the tense suffixes are added. Now see—

conjugation	root	विकरण	tense suffix	form	meaning
1st	= भू(भव)	+ अ	+ ति	= भवति	= (is)
4th	= क्रुध्	+ य	+ ति	= क्रुध्यति	= (is angry)
6th	= भुज्	+ अ	+ ति	= भुजति	= (is crooked)

Sri Vidyabharathi Book Centre, Srirangam

CC-O. In Public Domain. Digitized by eGangotri

10th = गण् + अय + ति = गणयति = (counts)
2nd = अद् + ० + ति = अत्ति = (eats)
2nd = पा + ० + ति = पाति = (protects)
2nd = या + ० + ति = याति = (goes)

The students might have understood the nature of the 2nd conjugational roots. Now see the forms—

'अद्' = (to eat)

परस्मैपद—

१ लट् = (Present) = १ अत्ति, अत्तः, अदन्ति । २ अत्सि, अत्थः, अत्थ । ३ अद्मि; अद्वः, अद्मः ॥

२ लोट् = (Imperative) = १ अत्तु, अत्ताम्; अदन्तु । २ अद्धि, अत्तम्, अत्त । ३ अदानि, अदाव, अदाम ॥

३ लङ् = (Past imperfect) = १ आदत्, आत्ताम्, आदन् । २ आदः, आत्तम्, आत्त । ३ आदम्, आद्व, आद्म ॥

४ लिङ् = (Potential mood) = १ अद्याम्, अद्याताम्, अद्युः । २ अद्याः, अद्यातम्, अद्यात, । अद्याम्, अद्याव, अद्याम ॥

2nd conjugation परस्मैपद roots

अद् = (to eat) अत्ति । आदत् । आद । अत्ता । अत्स्यति ।
अन् = (to breath) अनिति । आन । अनिता । अनिष्यति ।
अस् = (to be) अस्ति । आसीत् । अधिता । अधिष्यति ।
इ = (to go) एति । अयांचकार । एता । एष्यति ।
कु = (to sound) कौति । चुकाव । कोता । कोष्यति ।
ख्या = (to say, to talk) ख्याति । अख्यत् । ख्याता । ख्यास्यति ।
चकास् = (to shine) चकास्ति । चकासांचकार । चकासिता । चकासिष्यति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

जक्ष् = (to eat) जक्षिति । जजक्ष । जक्षिता । जक्षिष्यति ।
जागृ = (to awake) जागर्ति । जजागार । जागरिता । जागरिष्यति ।
दरिद्रा= (to be poor) दरिद्राति । दरिद्राञ्चकार–ददरिद्रौ । दरिद्रिता । दरिद्रिष्यति ।
दा = (to cut) दाति । ददौ । दाता । दास्यति ।
द्रा = (to run) द्राति । ददौ । द्राता । द्रास्यति ।
नु = (to praise) नौति । नुनाव । नविता । नविष्यति ।
पा = (to protect) पाति । पपौ । पाता । पास्यति ।
भा = (to shine) भाति । बभौ । भाता । भास्यति ।
या = (to go) याति । ययौ । याता । यास्यति ।
मा = (to measure) माति । ममौ । माता । मास्यति ।
यु = (to mix) यौति । युयाव । यविता । यविष्यति ।
रा = (to make a gift) राति । ररौ । राता । रास्यति ।
रुद् = (to weep) रोदिति । रुरोद । रोदिता । रोदिष्यति ।
ला = (to receive) लाति । ललौ । लाता । लास्यति ।
वच् = (to talk) वक्ति । उवाच । वक्ता । वक्ष्यति ।

Frame the forms of the above and use them in sentences

संस्कृत–वाक्यानि

१ अहं फलं अश्नि । त्वं फलं अत्सि किम् ? स किं फलं न अत्ति ? राम फलानि एव अत्तु ।

२ तत्र पुस्तकं अस्ति, परंतु दीपः नास्ति । त्वं कुत्र असि ? अहं अत्रैव अस्मि ।

३ स शोभनां कथां ख्याति । त्वं किं न ख्यासि ? यथा स शोभनां कथां आख्याति तथा त्वं किं न आख्यासि ?

४ अद्य स जागर्ति । अहं अद्य न जागर्मि । त्वं किमर्थं जागर्षि ? स जागर्तु । त्वं जागृहि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

५ राजा धनं ब्राह्मणाय राति। स तस्मै पुस्तकं रास्यति। अहं न तुभ्यं द्रव्यं रामि।

६ राजा मानवान् पाति। राष्ट्रं अपि राजा एव पाति। त्वं किं पासि? सर्वं ईश्वरः पाति।

७ अश्वः शीघ्रं याति। श्वा अपि तथैव यातु। त्वं याहि इदानीं। अहं न यास्यामि। स यातु।

८ त्वं किमर्थं रोदिषि? यथा स रोदिति तथा कः अपि न रोदिति। अहं नैव रोदिष्यामि।

९ स वक्ति। अहं वच्मि। त्वं वक्षि। स किं वक्ष्यति? अहमपि तथैव वक्ष्यामि। मनुष्याः वचन्तु।

१० मनुष्यः धनं पति। बालकः इदानीं गृहं पतु। त्वं किं तत्र न पष्यसि? अहं अपि नैव तत्र पष्यामि।

Forms of 2nd conjugational roots

'अस्' = (to be)

१ लट् = (present) = १ अस्ति, स्तः, सन्ति। २ असि, स्थः, स्थ। ३ अस्मि, स्वः, स्मः।

२ लोट् = (Imperative) = १ अस्तु, स्ताम्, सन्तु। २ एधि, स्तम्, स्त। ३ असानि, असाव, असाम॥

३ लङ् = (impertect) = १ आसीत्, आस्ताम्, आसन्। २ आसीः, ३ आस्ताम्, आस्त। ३ आसम्, आस्व, आस्म॥

४ लिङ् = (potential mood) = १ स्यात्, स्याताम्, स्युः। २ स्याः, स्यातम्, स्यात। ३ स्याम्, स्याव, स्याम॥

'इ' = (to go)

१ लट् = १ एति, इतः, यन्ति। २ एषि, इथः, इथ। ३ एमि, इवः, इमः।

×

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

२ लोट् = १ एतु, इताम्, यन्तु । २ एहि, इतम्, इत । ३ अयानि, अयाव, अयाम ॥

३ लङ् = १ ऐत्, ऐताम्, आयन् । २ ऐः, ऐतम्, ऐत । ३ आयम्, ऐव, ऐम ॥

४ लिङ् = १ इयात्, इयाताम्, इयुः । २ इयाः, इयातम्, इयात । ३ इयाम्, इयाव, इयाम ॥

'ख्या' = (to talk)

१ लट् = १ ख्याति, ख्यातः, ख्यान्ति । २ ख्यासि, ख्याथः, ख्याथ । ३ ख्यामि, ख्यावः, ख्यामः ॥

२ लोट् = १ ख्यातु, ख्याताम्, ख्यान्तु । २ ख्याहि, ख्यातम्, ख्यात । ३ ख्याति, ख्याव, ख्याम ॥

३ लङ् = १ अख्यात्, अख्याताम्, अख्युः— अख्यन् । २ अख्याः, अख्यातम् अख्यात । ३ अख्याम्, अख्याव, अख्याम ॥

४ लिङ् = १ ख्यायात्, ख्यायाताम् ख्यायुः । २ ख्यायाः, ख्यायातम्, ख्यायात, ३ ख्यायाम्, ख्यायाव, ख्यायाम ॥

'जागृ' = (to awake)

१ लट् = १ जागर्ति, जागृतः, जाग्रति । २ जागर्षि, जागृथः, जागृथ । जागर्मि, जागृवः, जागृमः ॥

२ लोट् = १ जागर्तु, जागृताम्, जाग्रतु । २ जागृहि, जागृतम्, जागृत । ३ जागराणि, जागराव, जागराम ॥

३ लङ् = १ अजागः, अजागृताम्, अजागरः, । २ अजागः, अजागृतम्, अजागृत । ३ अजागरम्, अजागृव, अजागृम ॥

४ लिङ् = १ जागृयात्, जागृयाताम्, जागृयुः । २ जागृयाः, जागृयतम्, जागृयात । ३ जागृयाम्, जागृयाव, जागृयाम ॥

Note

For the benefit of the students, some forms of the root are given above. They can frame other forms likevise and usse them in sintences.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

१ अहं फलमस्मि । त्वं किमस्ति ? स फलं किं नास्ति ? रामोऽद्य फलान्येवास्तु । अहमस्मि फलम् । फलमद्म्यहम् । अद्य स किं फलानि नास्ति ? सोऽद्य किं नास्ति फलानि ?

२ अत्र दीपो नास्ति । नास्त्यत्र दीपः । नात्रास्ति दीपः । तत्र पुस्तकमस्ति । पुस्तकमस्ति तत्र । अत्र पुस्तकं नास्ति । नास्त्यत्र पुस्तकम् । पुस्तकं नास्त्यत्र ।

३ त्वं कुत्रासि ? त्वं कुत्र गतोऽसि ? त्वं कुत्र गतोऽसीदानीम् ? त्वं कस्मात्स्थानादागतोऽसीदानीम् ?

Lesson– 10

'नु' = (to Praise)

१ लट् = १ नौति, नुतः, नुवन्ति, । २ नौषि, नुथः, नुथ । ३ नौमि, नुवः, नुमः ॥

२ लोट् = १ नौतु, नुताम्, नुवन्तु । २ नुहि, नुतम्, नुत । ३ नवानि, नवाव, नवाम ॥

३ लङ् = १ अनौत्, अनुताम्, अनुवन् । २ अनौः, अनुतम्, अनुत । ३ अनुवम्, अनुव, अनुम ॥

४ लिङ् = १ नुयात्, नुयाताम्, नुयुः । २ नुयाः, नुयातम्, नुयात । ३ नुयाम्, नुयाव, नुयाम ॥

'वश्' = (to wish)

१ लट् = १ वष्टि, उष्टः, उशन्ति । २ वक्षि, उष्ठः, उष्ठ । ३ वश्मि, उश्वः, उश्मः ॥

२ लोट् = १ वष्टु, उष्टाम्, उशन्तु । २ उड्ढि, उष्टम्, उष्ठ । ३ वशानि, वशाव, वशाम ॥

३ लङ् = १ अवट्, औष्टाम् औशन् २ औशः, औष्टम्, औष्ठ ३ औशम् औश्व, औष्टम

४ लिङ् = १ उश्यात्, उश्यास्ताम्, उश्युः । २ उश्याः, उश्यास्तम्, उश्यास्त । ३ उश्यास्म, उश्यास्व, उश्यास्म ॥

Sri Vidyabharati Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'विद्' – (to know)

३ लट् = १ वेत्ति, वित्तः, विदन्ति । २ वेत्सि, वित्थः, वित्थ । ३ वेद्मि, विद्वः, विद्मः ॥

Other forms of this root are made in the following way.

१ वेद, विदतुः, विदुः । २ वेत्थ, विदथुः, विद, । ३ वेद, विद्व, विद्म ॥

२ लोट् = १ वेत्तु, वित्ताम्, विदन्तु । २ विद्धि, वित्तम्, वित्त । ३ वेदानि, वेदाव, वेदाम ॥

Other forms of this root are made in the following way.

१ विदाङ्करोतु, विदाङ्कुरुताम्, विदाङ्कुर्वन्तु । २ विदाङ्कुरु, विदाङ्कुरुताम्, विदाङ्कुरुत । ३ विदाङ्करणवाणि, विदाङ्करवाव, विदाङ्करवाम ॥

३ लङ् = १ अवेत्, अवित्ताम्, अविदुः । अवेः अवित्तम्, अवित्त । ३ अवेदम्, अविद्व, अविद्म ॥

४ लिङ् = १ विद्यात्, विद्याताम्, विद्युः । २ विद्याः, विद्यातम्, विद्यात । ३ विद्याम्, विद्याव, विद्याम् ॥

'शास्' = (to govern)

१ लट् = १ शास्ति, शिष्टः, शासति । २ शास्सि, शिष्टः, शिष्ट । ३ शास्मि, शिष्वः, शिष्मः ।

२ लोट् = १ शास्तु, शिष्टाम्, शासतु । २ शाधि, शिष्टम्, शिष्ट । ३ शासानि, शासाव, शासाम ॥

३ लङ् = १ अशात्, अशिष्टाम्, अशासुः । २ अशाः, अशिष्टम्, अशिष्ट । ३ अशासम्, अशिष्व, अशिष्म ॥

४ लिङ् = १ शिष्यात्, शिष्यातम्, शिष्युः । शिष्याः, शिष्यातम्, शिष्यात । ३ शिष्याम्, शिष्याव, शिष्याम ॥

Let the students frame such forms of the roots of the 2nd conjugation परस्मैपद and use them in sentences.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

2nd conjugation परस्मैपदी roots

वश् = (to wish) वष्टि । उवाश । वशिता । वशिष्यति ।
वा = (to go) वाति । ववौ । वाता । वास्यति ।
विद् = (to know) वेत्ति, वेद । विवेद; विदांचकार । वेदिता । वेदिष्यति ।
वी = (to go) वेति, । विवाय । वेता । वेष्यति ।
शास् = (to rule) शास्ति । शशास । शासिता । शासिष्यति ।
श्रा = (to cook) श्राति । शश्रौ । श्राता । श्रास्यति ।
श्वस् = (to breath) श्वसिति । शश्वास । श्वसिता । श्वसिष्यति ।
सु = (to give birth to) सौति । सुषाव । सोता । सोष्यति ।
स्ना = (to bathe) स्नाति । सस्नौ । स्नाता । स्नास्यति ।
स्वप् = (to sleep) स्वपिति । सुष्वाप । स्वप्ता । स्वप्स्यति ।
हन् = (to kill) हन्ति । जघान । हन्ता । हनिष्यति ।

संस्कृत–वाक्यानि

१ अहं वने व्याघ्रान् हन्मि । त्वं तत्र कं हंसि ? सः अत्र वानरं हन्ति । व्याघ्रः मृगान् मा हन्तु । शूराः शत्रून् युद्धे घ्नन्ति ।

२ त्वं किमर्थं तं हंसि ? अहं नैव हनिष्यामि । स हनिष्यति किम् ? त्वं मा जहि ।

३ स तस्य तडागस्य जलेन तत्र स्नाति । अहमपि तथैव स्नामि । त्वं न स्नास्यसि किम् ?

४ सर्वे प्राणिनः श्वसन्ति । त्वं श्वसिषि । अहं अपि श्वसिमि । त्वं श्वसिष्यसि । अहं श्वसिष्यामि ।

५ राजा राष्ट्रं शास्ति । राजपुत्रः कदा राज्यं शासिष्यति । राज्ञः प्रथमः पुत्रः एव शासिष्यति नान्यः ।

सात्यकिः उवाच ।

यादृशः पुरुषस्यात्मा तादृशं संप्रभाषसे ।
यथारूपोऽन्तरात्मा ते तथारूपं प्रभाषसे ॥ १ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सन्ति वै पुरुषाः शूराः सन्ति कापुरुषास्तथा ।
उभावेतौ दृढौ पक्षौ दृश्येते पुरुषान्प्रति ॥ २ ॥
एकस्मिन्नेव जायेते कुले क्लीबमहाबलौ ।
फलाफलवती शाखे यथैकस्मिन्वनस्पतौ ॥ ३ ॥

(महाभारत उद्योग० ३)

सात्यकिः उवाच— पुरुषस्य यादृशः आत्मा तादृशं (त्वं) संप्रभाषसे । ते अन्तरात्मा यथारूपः तथारूपं (त्वं) प्रभाषसे ॥ १ ॥ पुरुषाः शूराः सन्ति वै, तथा कापुरुषाः (अपि) सन्ति । एतौ उभौ (अपि) दृढौ पक्षौ पुरुषान्प्रति दृश्येते ॥ २ ॥ एकस्मिन् एव कुले क्लीबमहाबलौ जायेते । यथा एकस्मिन् वनस्पतौ फलाफलवती शाखे (भवतः) ॥ ३ ॥

शब्दार्थ

यादृशः	= as, just as	क्लीब	= weak, coward,
तादृशः	= so, so also	कुल	= family dynasty
भाष्	= to say	महाबल	= very powerful
यथारूप	=in whatsoever form	फलाफलवती	= fruitful and fruitless
दृढ	= strong.		

The students can study the above verses.

संधि किये हुए वाक्य

१ अहं वने व्याघ्रान्हन्मि । हन्म्यहं व्याघ्रान्वने । व्याघ्रान्हन्म्यहं वने । त्वं तत्र कं हंसि ? कं हंसि तत्र त्वम् ? सोऽत्रं वानरं हन्ति । हन्त्यत्र स वानरम् । वानरमत्र स हन्ति ।

२ व्याधो मृगान्मा हन्तु । मृगान्मा व्याधो हन्तु । वा मृगान्व्याधो हन्तु । शूरा युद्धे शत्रून्घ्नन्ति । घ्नन्ति शूराः शत्रून्युद्धे । शत्रून्युद्धे शूरा घ्नन्ति ।

३ अहं नैव हनिष्यामि । अहमद्य नैव हनिष्यामि । अहमद्यात्र नैव तं हनिष्यामि । अहमद्यात्रेदानीं तं कथमपि नैव हनिष्यामि । क एवमद्यात्रेदानीं तं हनिष्यति ?

Siddhanta eBook Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 11

2nd conjugation आत्मनेपदी Roots

'आस्' = (to sit)

१ लट् = १ आस्ते, आसाते, आसते। २ आस्से, आसाथे, आध्वे। ३ आसे, आस्वहे, आस्महे॥

२ लोट् = १ आस्ताम्, आसाताम्, आसताम्। २ आस्व, आसाथाम्, आध्वम्। ३ आसै, आसावहै, आसामहै॥

३ लङ् = १ आस्त, आसाताम्, आसत। २ आस्थाः, आसाथाम्, आध्वम्। ३ आसि, आस्वहि, आस्महि॥

४ लिङ् = १ आसीत, आसीयाताम्, आसीरन्। २ आसीथाः, आसीयाथाम्, आसीध्वम्। ३ आसीय, आसीवहि, आसीमहि॥

'चक्ष्' = (to talk, to say)

१ लट् = १ चष्टे, चक्षाते, चक्षते। २ चक्षे, चक्षाथे, चड्ढ्वे। ३ चक्षे, चक्ष्वहे, चक्ष्महे॥

२ लोट् = १ चष्टाम्, चक्षाताम्, चक्षताम्। २ चक्ष्व, चक्षाथाम् चड्ढ्वम्। ३ चक्षै, चक्षावहै, चक्षामहै॥

३ लङ् = १ अचष्ट, अचक्षाताम्, अचक्षत। २ अचष्टाः, अचक्षाथाम् अचड्ढ्वम्। अचक्षि, अचक्ष्वहि, अचक्ष्महि॥

४ लिङ् = १ चक्षीत, चक्षीयाताम्, चक्षीरन्। २ चक्षीथाः, चक्षीयाथाम्, चक्षीध्वम्। ३ चक्षीय, चक्षीवहि, चक्षीमहि॥

In this way the following roots have their forms.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

2nd conjugation आत्मनेपदी root

आस् = (to sit) आस्ते । आसांचक्रे । आसिता । आसिष्यते ।

ईश् = (to gain mastry) ईष्टे । ईशांचक्रे । ईशिता । ईशिष्यते ।

चक्ष् = (to say) चष्टे । चचक्षे । ख्याता । ख्यास्यति–ते ।

वस् = (to cover) वस्ते । ववसे । वसिता । वसिष्यते ।

वृज् = (to give up) वृङ्क्ते । वव्रजे । वर्जिता । वर्जिष्यते ।

आशास् = (to wish) आशास्ते । आशशासे । आशासिता । आशासिष्यते ।

शी = (to sleep) शेते । शिश्ये । शयिता । शयिष्यते ।

सू = (to give birth to) सूते । सुषुवे । सोता, सविता । सोष्यते सविष्यते ।

संस्कृत–वाक्यानि

१ स पुरुषः वृक्षस्य अधस्तात् आस्ते । तौ पुरुषौ तत्र आसाते । सर्वे बालकाः तत्र आसते । त्वं कुत्र आस्से ?

२ ईशः सर्वं जगत् ईष्टे । त्वं किं ईशिषे ? ते सर्वे राजानः ईशते । वयं सर्वेऽपि ईश्महे । अहं ईशे ।

३ स बालः शोभनं चष्टे । त्वं इदानीं किं चक्षे ? सः अपि किं चक्षे ? ते शूराः किं चक्षते ?

४ मनुष्याः तत्र वसते । त्वं कुत्र वस्से ? अहं अत्र वसे । स तत्र वस्ताम् । त्वं अत्र वस्स्व ।

५ मनुष्यः धनं आशास्ते । त्वं किं आशास्से ? अहं न किमपि आशासे ।

६ नारी पुत्रं सूते । अहं बालकं सुवे । ताः स्त्रियः पुत्रान् सुवते । यूयं सूध्वे ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

2nd conjugation उभयपदी root

'ब्रू' = (to say)

१ लट् = (परस्मैपद) = १ ब्रवीति, ब्रूतः, ब्रुवन्ति । २ ब्रवीषि, ब्रूथः, ब्रूथ । ३ ब्रवीमि, ब्रूवः, ब्रूमः ॥

(परस्मै०) इसीके और एक प्रकारसे रूप होते हैं—

१ आह, आहतुः आहुः । २ आत्थ, आहथुः, ब्रूव । ३ ब्रूवीमि, ब्रूवः, ब्रूमः ॥

(आत्मनेपद) = १ ब्रूते, ब्रूवाते, ब्रुवते । २ ब्रूषे, ब्रुवाथे, ब्रूध्वे । ३ ब्रुवे, ब्रूवहे, ब्रूमहे ॥

२ लोट् = (परस्मैपद) = १ ब्रवीतु, ब्रूताम्, ब्रुवन्तु । २ ब्रूहि, ब्रूतम्, ब्रूत । ३ ब्रवाणि, ब्रवाव, ब्रवाम ॥

(आत्मनेपद) = १ ब्रूताम्, ब्रुवाताम्, ब्रुवताम् । २ ब्रूष्व, ब्रुवाथाम्, ब्रूध्वम् । ३ ब्रवै, ब्रवावहै, ब्रवामहै ॥

३ लङ् = (परस्मैपद) = १ अब्रवीत्, अब्रूताम्, अब्रुवन् । २ अब्रवीः, अब्रूतम्, अब्रूत । ३ अब्रवम्, अब्रूव, अब्रूम ॥

(आत्मनेपद) = १ अब्रूत, अब्रूवाताम्, अब्रूवत । २ अब्रूथाः, अब्रुवाथाम्, अब्रूध्वम् । ३ अब्रूवि, अब्रूवहि, अब्रूमहि ॥

४ लिङ् = (परस्मैपद) = १ ब्रूयात्, ब्रूयाताम्, ब्रूयुः । २ ब्रूयाः, ब्रूयाताम्, ब्रूयात । ३ ब्रूयाम्, ब्रूयाव, ब्रूयाम ॥

(आत्मनेपद) = १ ब्रुवीत, ब्रुवीयाताम्, ब्रुवीरन् । २ ब्रुवीथाः, ब्रुवीयाथाम्, ब्रुवीध्वम् । ३ ब्रुवीय, ब्रुवीवहि, ब्रुवीमहि ॥

The roots of the उभयपदी have forms i. e., परस्मैपद as well as आत्मनेपद we have said this even before

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

2nd conjugation उभयपदी roots

दुह् = (to milk) दोग्धि, दुग्धे। दुदोह, दुदुहे। दोग्धा। धोक्ष्यति-ते।

द्विष् = (to hate) द्वेष्टि, द्विष्टे। विद्वेष, विद्विषे। द्वेष्टा। द्वेक्ष्यति-ते।

ब्रू = (to talk) ब्रवीति, ब्रूते। उवाच; ऊचे। वक्ता। वक्ष्यति-ते।

लिह् = (to taste) लेढि, लीढे। लिलेह, लिलिहे। लेढा। लेक्ष्यति-ते।

स्तु = (to praise) स्तौति, स्तवीति-स्तुते,-स्तुवीते। तुष्टाव, तुष्टुवे। स्तोता। स्तोष्यति-ते।

संस्कृत-वाक्यानि

१ भक्ताः ईश्वरं स्तौति। त्वं कं स्तौषि? अहं कं अपि मानवं न स्तौमि। सर्वे बालकाः परमेश्वरं स्तुवन्तु।

२ स किं ब्रवीति? त्वं किं ब्रवीषि? अहं न किमपि ब्रवीमि। स ब्रूताम्। त्वं ब्रूहि।

३ कं त्वं द्वेक्षि? अहं न कमपि द्वेष्मि। यः सर्वदा एव द्वेष्टि स द्वेष्टु।

४ माता गां दोग्धि। त्वं किं न गां धोक्षि? अहं न दोह्मि किन्तु मम पत्नीः दोग्धि। सर्वे मानवाः गावः दुहन्तु।

५ बालकः मधु लेढि। त्वं क्षीरं लेक्षि किम्? अहं क्षीरं न लेह्मि? प्राणिनः फलं लिहन्ति।

Let the students frame the forms like this and make use of them.

Here ends the section of 2nd conjugational roots.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lesson– 12

(Mahabharata, Anu. ch. 2.)

भीष्म उवाच— अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः ॥ ४ ॥
मनोः प्रजापते राजन्निक्ष्वाकुरभवत्सुतः ।
तस्य पुत्रशतं जज्ञे नृपतेः सूर्यवर्चसः ॥ ५ ॥
दशमस्तस्य पुत्रस्तु दशाश्वो नाम भारत ।
माहिष्मत्यामभूद्राजा धर्मात्मा सत्यविक्रमः ॥ ६ ॥
दशाश्वस्य सुतस्त्वासीद्राजा परमधार्मिकः ।
सत्ये तपसि दाने च यस्य नित्यं रतं मनः ॥ ७ ॥
मदिराश्व इति ख्यातः पृथिव्यां पृथिवीपतिः ।
धनुर्वेदे च वेदे च निरतो योऽभवत्सदा । ॥ ८ ॥

भीष्मः उवाच— गृहस्थेन धर्ममाश्रित्य धर्मं कृत्वा यथा येन प्रकारेण मृत्युः मरणं निर्जितः जितः अत्रापि अस्मिन् विषये अपि पुरातनं प्राचीनं इतिहासं कथां (वृद्धाः) उदाहरन्ति कथयन्ति ॥ ४ ॥ हे राजन् ! हे नृप ! प्रजापतेः नराधिपस्य मनोः इक्ष्वाकुः इक्ष्वाकुनामा सुतः पुत्रः जातः । सूर्यवर्चसो रवितुल्यप्रभावस्य नृपतेः भूपस्य तस्य इक्ष्वाकोः पुत्रशतं शतसंख्याः सुतः जज्ञे जाताः ॥ ५ ॥ हे भारत ! तस्य इक्ष्वाकोः दशमः दशाश्वो नाम पुत्रः तु सुतः तु माहिष्मत्यां नगर्यां धर्मात्मा धर्मनिष्ठः सत्यविक्रमः यथार्थपराक्रमः राजा अभूत् अभवत् ॥ ६ ॥ यस्य मनः चेतः नित्यं सदा सत्ये यथार्थभाषणे तपसि उपवासादितपश्चरणे दाने त्यागे च रतं आसक्तं आसीत्, सः दशाश्वस्य सुतः पुत्रः तु परमधार्मिकः राजा नृपः आसीत् बभूव ॥ ७ ॥ यः पृथिवीपतिः भूपतिः सदा सर्वस्मिन् काले धनुर्वेदे धनुर्विद्यायां वेदे श्रुतौ च निरतः प्रवीणः मदिराश्च इति च पृथिव्यां ख्यातः अभवत् स एव दशाश्वस्य पुत्रः ॥ ८ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मदिराश्वस्य पुत्रस्तु द्युतिमान्नाम पार्थिवः ।
महाभागो महातेजा महासत्त्वो महाबलः ॥ ९ ॥

पुत्रो द्युतिमतस्त्वासीद्राजा परमधार्मिकः ।
सर्वलोकेषु विख्यातः सुवीरो नाम नामतः ॥ १० ॥

धर्मात्मा कोषवांश्चापि देवराज इवापरः ।
सुवीरस्य तु पुत्रोऽभूत्सर्वसंग्रामदुर्जयः ॥ ११ ॥

स दुर्जय इति ख्यातः सर्वशस्त्रभृतां वरः ।
दुर्जयस्येन्द्रवपुषः पुत्रोऽश्विसदृशद्युतिः ॥ १२ ॥

दुर्योधनो नाम महान् राजा राजर्षिसत्तमः ।
तस्येन्द्रसमवीर्यस्य संग्रामेष्वनिवर्तिनः ॥ १३ ॥

मदिराश्वस्य पुत्रः सूनुः तु महाभागः महाभाग्यशाली महातेजाः विपुलपराक्रमः महासत्त्वः अतीवः धैर्यवान् महाबलः अतीव बलिष्ठः द्युतिमान्नाम पार्थिवः पृथिवीपतिः अभूत् ॥ ९ ॥ द्युतिमतः पुत्रः तु परमधार्मिकः अतिशयेन धर्मरतः सर्वलोकेषु सर्वेषु अखिलेषु लोकेषु भारतादिषु प्रदेशेषु विख्यातः प्रसिद्धिं गतः नामतः नाम्ना सुवीरो नाम सुवीर इति ख्यातः राजा नृपः आसीत् अभवत् ॥ १० ॥ सुवीरस्य तु पुत्रः सर्वसंग्रामदुर्जयः अखिलेषु युद्धेषु परैः दुर्जयः दुःखेन जेतुं शक्यः अपरः द्वितीयः देवराज इन्द्रः इव धर्मात्मा धर्मरतः अपि च कोषवान् अभूत् ॥ ११ ॥ सर्वशस्त्रभृतां निखिलशस्त्रधारिणां मध्ये वरः श्रेष्ठः सः सुवीरस्य पुत्रः दुर्जयः इति दुर्जयनाम्ना ख्यातः प्रसिद्धिं गतः । इन्द्रवपुषः इन्द्रसमानशरीरस्य अश्विसदृशद्युतिः अश्विदेवसमानरूपः ॥ १२ ॥ राजर्षिसत्तमः ऋषितुल्य-नृपाणां मध्ये श्रेष्ठः दुर्योधनो नाम महान् राजा आसीत् । इन्द्रसमवीर्यस्य इन्द्रतुल्यपराक्रमस्य संग्रामेषु युद्धेषु अनिवर्तिनः अपलायमानस्य तस्य ॥ १३ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विषये वासवस्तस्य सम्यगेव प्रवर्षति ।
रत्नैर्धनैश्च पशुभिः सस्यैश्चापि पृथग्विधैः ॥ १४ ॥
नगरं विषयश्चास्य प्रतिपूर्णस्तदाऽभवत् ।
न तस्य विषये चाभूत्कृपणो नापि दुर्गतः ॥ १५ ॥
व्याधितो वा कृशो वाऽपि तस्मिन्नाभून्नरः क्वचित् ।
सुदक्षिणो मधुरवागनसूयुर्जितेन्द्रियः ।
धर्मात्मा चानृशंसश्च विक्रान्तोऽथाविकत्थनः ॥ १६ ॥
यज्वा च दान्तो मेधावी ब्रह्मण्यः सत्यसंगरः ।
न चावमन्ता दाता च वेदवेदाङ्गपारगः ॥ १७ ॥
तं नर्मदा देवनदी पुण्या शीतजला शिवा ।
चकमे पुरुषव्याघ्रं स्वेन भावेन भारत ॥ १८ ॥

तस्य देशे वासवः इन्द्रः सम्यगेव उत्तमप्रकारेण प्रवर्षति वृष्टिं करोति । अस्य नगरं विषयः देशः च रत्नैः मणिभिः धनैः द्रव्यैः अपि च पृथग्विधैः धान्यैः ॥ १४ ॥ तदा प्रतिपूर्णः परिपूर्णः अभवत् । तस्य विषये देशे कृपणो अज्ञानशूरः दुर्गतः दरिद्रः अपि न अभूत् ॥ १५ ॥ तस्मिन् तस्य देशे क्वचित् व्याधितः रुग्णः कृशः दुर्बलः अपि वा नरः मनुष्यः नाभूत् नासीत् । स च सुदक्षिणः अतीव उदारः मधुरवाक् मधुरभाषी अनसूयुः विगतद्वेषः जितेन्द्रियः संयतेन्द्रियः धर्मात्मा धार्मिकः अनृसंसः अक्रूरः विक्रान्तः विक्रमशाली अथ अपि च अविकत्थनः आत्मश्लाघामकुर्वाणः ॥ १६ ॥ यज्वा विधिपूर्वकं यज्ञकर्ता दान्तः बाह्येन्द्रियविजयी मेधावी बुद्धिमान् ब्रह्मण्यः ब्राह्मणभक्तः सत्यसंगरः सत्यप्रतिज्ञः अभवत्, अवमन्ता परेषां अवमानशीलः च न आसीत् दाता दानशीलः च वेदवेदाङ्गपारगः वेदेषु शिक्षादिषु वेदानामङ्गेषु च प्रवीणः आसीत् ॥ १७ ॥ पुरुषव्याघ्रं तं दुर्योधनं पुण्या पुण्यासाधनीभूता शीतजला शीतजलोदका शिवा मंगलकारिणी देवनदी देवानां अमराणां नदी नर्मदा स्वेन स्वकीयेन भावेन मनसा चकमे वरयामास ॥ १८ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तस्यां जज्ञे तदा नद्यां कन्या राजीवलोचना ।
नाम्ना सुदर्शना राजन् रूपेण च सुदर्शना ॥ १९ ॥
तादृग्रूपा न नारीषु भूतपूर्वा युधिष्ठिर ।
दुर्योधनसुता यादृगभवद्वरवर्णिनी ॥ २० ॥
तामग्निश्चकमे साक्षाद्राजकन्यां सुदर्शनाम् ।
भूत्वा च ब्राह्मणो राजन् वरयामास तं नृपम् ॥ २१ ॥
दरिद्रोऽस्मीत्यवर्णश्च ममायमिति पार्थिवः ।
न दित्सति सुतां तस्मै तां विप्राय सुदर्शनाम् ॥ २२ ॥
ततोऽस्य वितते यज्ञे नष्टोऽभूद्धव्यवाहनः ।
ततः सुदुःखितो राजा वाक्यमाह द्विजांस्तदा ॥ २३ ॥

हे राजन् ! तदा तस्यां नद्यां नर्मदायां राजीवलोचना कमलसदृशलोचना नाम्ना सुदर्शना रूपेण च सुदर्शना दर्शनीया कन्या बाला जज्ञे जाता ॥ १९ ॥ दुर्योधनसुता दुर्योधनस्य पुत्री यादृग् यादृशी वरवर्णिनी उत्तमरूपवती अभवत् बभूव, हे युधिष्ठिर ! तादृग् रूपा नारीषु भूतपूर्वा न पूर्वं भूता ॥ २० ॥ हे राजन् ! तां राजकन्यां सुदर्शनां साक्षात् अग्निः चकमे ऐच्छत् । अग्निः च ब्राह्मणो भूत्वा ब्राह्मणवेषं गृहीत्वा तं दुर्योधनं नृपं वरयामास प्रार्थयामास ॥ २१ ॥ पार्थिवः राजा अयं दरिद्रः निर्धनः मम असवर्णः भिन्नवर्णियः च इति मत्वा तस्मै विप्राय तां सुदर्शनां सुतां कन्यां न दित्सति दातुं नेच्छति स्म ॥ २२ ॥ ततः अनंतरं अस्य दुर्योधनस्य वितते आरब्धे यज्ञे हव्यवाहनः अग्निः नष्टोऽभूत् नाशं गतः । ततः अग्ननाशानन्तरं राजा दुर्योधनः सुदुःखितो नितरां दुःखितो भूत्वा तदा द्विजान् वाक्यं वक्ष्यमाणं आह उक्तवान् ॥ २३ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sanskrit Self Teacher

By

Padmabhushan Pt. Shripad Damodar Satwalekar

(English Edition)

1– The easiest way to the study of Sanskrit is shown in this Series.

2– One, who devotes half an hour daily to these books, can learn within a period of six months that much of Sanskrit, so as to follow Mahabharat and Ramayana easily.

3– Hundreds of students have been so far benefited by this series.

4– The Series comprises 18 parts.

Price– Full Set 18 Parts Rs. 36.00
(Rs. 2.00 for each part).

Hurry up. Make haste to place your order for the books with—

The manager
Swadhyaya Mandal
Killa-Pardi
Dist. Valsad (Gujarat)

Printer and Publisher : V. S. Satwalekar,
Bharat Mudranalaya, PARDI. (Gujrat)
Sri Vidyabharathi Book Centre, Sringeri